# Shri Ramopasana

# श्रीरामोपासना

## Document Information

Text title : Shri Ramopasana

File name : rAmopAsanA.itx

Category : raama

Location : doc_raama

Proofread by : Mrityunjay Pandey

Latest update : February 15, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 16, 2024

*sanskritdocuments.org*

# श्रीरामोपासना

॥ श्रीहनुमते नमः ॥

॥ श्रीमते रामानन्दाचार्याय नमः ॥

जगद्गुरु श्रीरामानन्दाचार्यप्रतिष्ठापित श्रीरामोपासना

सीतानाथसमारम्भां रामानन्दार्यमध्यमाम् ।
अस्मदाचार्यपर्यन्तां वन्दे गुरुपरम्पराम् ॥

यत्र यत्र रघुनाथकीर्तनं तत्र तत्र कृतमस्तकाञ्जलिम् ।
वाष्पवारिपरिपूर्णलोचनं मारुतिन्नमतराक्षसान्तकम् ॥

वाञ्छाकल्पतरुभ्यश्च कृपासिन्धुभ्य एव च ।
पतितानां पावनेभ्यो वैष्णवेभ्यो नमोनमः ॥

तदित्थं पञ्चसंस्कारसम्पन्नो मुमुक्षुरुपासको मुहूर्तमात्रावशिष्टायां रात्रौ निरलसः प्रातः समुत्थाय सविधिनित्यक्रियां सम्पूर्य धौतपाणिपादः प्राङ्मुखोपविश्य सन्ध्यावन्दनादिकर्माणि कृत्वा आचार्यपरम्परां स्मरेत्-
श्रीरामं जनकात्मजामनिलजं वेधो वशिष्ठावृषी,
योगीशं च पराशरं श्रुतिविदं व्यासं जिताक्षं शुकम् ।
श्रीमन्तं पुरुषोत्तमं गुणनिधिं गङ्गाधराद्यान्यतीन्,
श्रीमद्राघवदेशिकञ्च वरदं स्वाचार्यवर्यं श्रये ॥

अथ भगवन्तं स्तुत्वा पञ्चोपनिषन्न्यासं कुर्यात् - ।

## स्तुतिः

हरिः ॐ सचन्त यदुषसः सूर्येण चित्रामस्य केतवो रामविन्दन् ।
आ यन्नक्षत्रं ददृशे दिवो न पुनर्यतो नकिरद्धा नु वेद ॥

ऋग्वेद १०.१११.०७

हरिः ॐ अर्वाची सुभगे भव सीते वन्दामहे त्वा ।
यथा नः सुभगाससि यथा नः सुफलाससि ॥

ऋग्वेद् ४.०५७.०६

## न्यासः

ॐ षां नमः पराय परमेष्ठ्यात्मने नमः इति शिरसि ॥ १॥

ॐ यां नमः पराय पुरुषात्मने नमः इति नासाग्रे ॥ २॥

ॐ रां नमः पराय विश्वात्मने नमः इति हृदये ॥ ३॥

ॐ वां नमः पराय निवृत्त्यात्मने नमः इति गुह्ये ॥ ४॥

ॐ लां नमः पराय सर्वात्मने नमः इति पादयोः ॥ ५॥

एवं पञ्चोपनिषन्न्यासं विधाय श्रीमन्त्रराजन्यासं कुर्यात् ।
ॐ रां ज्ञानाय अङ्गुष्ठाभ्यां नमः ।
ॐ नमः ऐश्वर्याय तर्जनीभ्यां नमः ।
ॐ रामाय शक्त्यै नमः मध्यमाभ्यां नमः ।
ॐ बलाय अनामिकाभ्यां नमः ।
ॐ तेजसे कनिष्ठिकाभ्यां नमः ।
ॐ रां ज्ञानाय हृदयाय नमः ।
ॐ नमः ऐश्वर्याय शिरसे स्वाहा ।
ॐ रामाय शक्त्यै शिखायै वषट् ।
ॐ बलाय कवचाय हुम् ।
ॐ तेजसे नेत्राभ्यांवौषट् ।
ॐ रामाय वीर्याय अस्त्राय फट् ।
अथ दिव्यमङ्गलविग्रहस्य साङ्गसायुधसपरिकरस्य भगवतो रामभद्रस्य मनसैव एकैकमङ्गं ब्रह्मसृष्टिलोकोत्तरसौन्दर्यलावण्याढ्यं ध्यायन् (प्रातःस्मरामिरघुनाथमुखारविन्दम्......) श्रीगुरुपरम्परादिकमनुसन्दधत् अप्रमेयकृपारत्नाकरस्य भगवतः श्रीरामचन्द्रस्य सुप्रभातं पठन् अर्चनयोग्यो मुमुक्षुरुपासको दण्डवद्भगवन्तं प्रणम्य भगवन्मन्दिरं प्रविश्य अर्चनपात्रादीनि सम्प्रक्षालयेत् ॥

# राघवेन्द्रसुप्रभातं

सर्गस्थितिप्रलयकर्मधुरन्धराय,
ब्रह्मेन्द्ररुद्र परिपूजितपादुकाय ।
सद्धर्मरक्षणविधौ सततं रताय,
हे राघवेन्द्र ! भवते नवसुप्रभातम् ॥ १॥

हे कोसलेश ! सरयूजलशीतलोऽसौ,
रम्यः सुगन्धिभरितः पवनः प्रभाते ।
संवाहयत्यतिसुखेन वपुस्त्वदीयं,
हे राघवेन्द्र ! भवते नवसुप्रभातम् ॥ २॥

हृष्टो वशिष्ठपरमर्षिरयं शुभाशी-
राशीनिमान्वितरितुं तव पुण्य गेहे ।
सम्प्राप्त एव बहुसन्तगणैः परीतः,
हे राघवेन्द्र ! भवते नवसुप्रभातम् ॥ ३॥

इक्ष्वाकुवंशकुलदीपक ! पुण्यकीर्ते !
हे जानकीप्रणयपाशविलासमूर्ते !
उन्मीलयामलदृशौ करुणामयौ ते,
हे राघवेन्द्र ! भवते नवसुप्रभातम् ॥ ४॥

तातस्तु ते दशरथो मुदितः सदैव,
मात्राभिरत्र सहितः समुपागतोऽसौ ।
त्वद्रम्यमाननसुखं समवाप्तुकामः,
हे राघवेन्द्र भवते नवसुप्रभातम् ॥ ५॥

अन्येऽपि ये तव सुभक्तिरता मनुष्याः,
लोके स्वजन्मफलमाप्तुमिह प्रभाते ।
त्वन्नामधेयजपमङ्गलमाचरन्ति,
हे राघवेन्द्र ! भवते नवसुप्रभातम् ॥ ६॥

हे रामचन्द्र ! करुणामय, दीनबन्धो !
हे कोसलेश ! भवतापविनाशदक्ष !
सीतापते ! रघुपते ! जनतापते हे !
हे राघवेन्द्र ! भवते नवसुप्रभातम् ॥ ७॥

## उत्थापन

घण्टानादपूर्वकं उत्थापनमन्त्रोच्चारणपूर्वकं श्रीभगवन्तमुत्थापयेत्

उत्थापन मन्त्रः

कौशल्यासुप्रजा राम पूर्वासन्ध्या प्रवर्तते ।
उत्तिष्ठ नरशार्दूल कर्तव्यं दैवमाह्निकम् ॥ १॥

उत्तिष्ठोत्तिष्ठ भद्रं ते त्यज निद्रां जगत्पते । त्वदीयोत्थानमात्रेण उत्थितं भुवनत्रयम् ॥ २॥

उत्तिष्ठोत्तिष्ठ श्रीराम भद्रं ते करुणानिधे । उत्तिष्ठ जानकीकान्त त्रैलोक्यं मङ्गलं कुरु ॥ ३॥

त्वदीयभावपूताङ्गाः सपर्याकाङ्क्षया प्रभो ।
प्रार्थयन्ते समागत्य रामभद्र प्रबुध्यताम् ॥ ४॥

श्रीमद्भगवद्चरणचञ्चरीकमुमुक्षुरुपसकाभिमतानुरूपगुणविभवैश्वर्यशीलाद्यनवधिकातिशयासङ्ख्यकल्याणगु
अप्रमेयकृपारत्नाकरं भगवन्तं श्रीरामचन्द्रं शरणमहं प्रपद्ये ।
तदनु आच्छादनादिकं सङ्गृह्य, निर्माल्यं एकतः संस्थाप्य पाद्यं
(दूर्वाविष्णुपर्णीपद्मश्यामकसहितं जलं पाद्यपात्रे निक्षिपेत्) -
ॐएतावानस्यमहिमातोज्यायाँश्चपूरुषः ।
पादोऽस्यविश्वाभूतानित्रिपादस्यामृतंदिवि ॥

इदं पाद्यं मया दत्तं दिव्यं नरवरोत्तम ।
प्रसीद जानकीनाथ ! गृहाण सम्मुखो भव ॥

इति पाद्यं समर्पयामि ।
रां रामाय नमः अप्रमेयकृपारत्नाकराय भगवते श्रीरामचन्द्राय नमः पाद्यं समर्पयामि । इत्युक्त्वा भगवतः पादौ प्रक्षाल्य अर्घ्यं समर्पयेत् ।

## अर्घ्यमन्त्रः

(सर्षपाक्षतकुशयवतिलचन्दनपुष्पजायफलसहितं जलमर्घ्यपात्रे निक्षिपेत्) -
ॐत्रिपादूर्ध्वऽउदैत्पुरुषःपादोस्येहाभवत्पुनः।
ततोविष्वङ्क्रामत्साशनानशनेऽभि ॥

दिव्यौषधिरसोपेतं दिव्य सौरभसंयुतम् ।
तुलसीपुष्पदर्भाढ्यमर्घ्यं मे प्रतिगृह्यताम् ॥

इत्यर्घ्यं समर्पयामि ।
ॐरां रामाय नमः अप्रमेयकृपारत्नाकराय भगवते श्रीरामचन्द्राय नमः अर्घ्यं समर्पयामि ।

## आचमनं

(एलालवङ्गकङ्कोलजातिसहितं जलमाचमनपात्रे निक्षिपेत् ।)
ततोव्विराडजायतव्विराजोऽधिपूरुषः ।
सजातोऽत्त्यरिच्च्यतपश्चाद्भूमिमथोपुरः ॥

सुगन्धिवासितं दिव्यं निर्मलं सरयूदकम् ।
गृहाणाऽऽचमनं नाथ ! प्रसीद मम राघव ॥

इत्याचमनीयं समर्पयामि ।
ॐ रां रामाय नमः अप्रमेयकृपारत्नाकराय भगवते श्रीरामचन्द्राय नमः आचमनीयं जलं समर्पयामि ।

## दन्तधावनं

मन्त्रराजेन तुलसीकाष्ठेन दन्तधावनं जिह्वालेखनञ्च कुर्यात् । मन्त्रोच्चारणपूर्वकं गण्डूषं समर्पयामीति जलं षड्कृत्वा पतितपावनाख्ये पात्रे निक्षिप्य पुनः मन्त्रराजेनैव मुखशोधनं समर्पयामीति विभाव्य तज्जलं तस्मिन्नेव पात्रे निक्षिपेत् ।
ततः मधुपर्कं निवेदयेत्- तत्र विधिः - रत्नखचितस्वर्णपात्रे दधि-मधु-घृतमिश्रितमधुपर्कं भगवतः पुरतः संस्थाप्य मधुपर्कमन्त्रः पठेत् ।

## मधुपर्कः

मधुव्वाताऽऋतायतेमधुक्षरन्न्तिसिन्धवः ।
माध्वीर्न्नःसन्त्वोषधीः ॥

नमो रामाय भद्राय तत्वज्ञानस्वरूपिणे ।
मधुपर्कं गृहाणेमं जानकीपतये नमः ॥

इति मधुपर्कं समर्पयामि ।
ॐ रां रामाय नमः अप्रमेयकृपारत्नाकराय भगवते श्रीरामचन्द्राय नमः मधुपर्कं समर्पयामि ।

पुनः ॐ रां रामाय नमः अप्रमेयकृपारत्नाकराय भगवते श्रीरामचन्द्राय नमः इत्युक्त्वा आचमनीयं जलं समर्प्य शुभ्रवस्त्रेण मुखंसम्प्रोक्ष्येत ततः भगवतः पुरतः चतुष्कोणमण्डलमध्ये बालोचित नवनीतादि स्निग्धभोज्यं अखण्डानि ऋतुफलानि च संस्थाप्य धूपमाघ्रापयेत् ।

## धूपमन्त्रः

धूरसिधूर्व्वधूर्व्वन्तन्धूर्व्वतंयोस्मान्धूर्व्वतितन्धूर्व्वयंव्वयन्धूर्व्वामः ।
देवानामसिव्वह्नितमꣳ सस्नितमम्पप्रितमञ्जुष्टतमन्देवहूतमम् ॥

वनस्पतिरसोत्पन्नं सुगन्धाढ्यं मनोहरम् ।
धूपं गृहाण देवेश ! जानक्या सह राघव ॥

इति धूपं समर्पयामि ।
ॐ रां रामाय नमः अप्रमेयकृपारत्नाकराय भगवते श्रीरामचन्द्राय नमः धूपमाघ्रापयामि ।
हस्तौप्रक्षाल्य दीपं समर्पयामि

## दीपमन्त्रः

चन्द्रमामनसोजातश्चक्षोःसूर्योऽजायत ।
श्रोत्त्राद्वायुश्चप्राणश्चमुखादग्निरजायत ।
घृतवर्ति समायुक्तं कर्पूरादि समन्वितम् ।
दीपं गृहाण देवेश ! मम सिद्धिप्रदो भव ॥

इति दीपं दर्शयामि ।
हस्तौ प्रक्षाल्य पार्षदान् सन्नह्य घण्टानादं नादयन् तुलसीदलमिश्रितेन तुलस्युदकेन ॐ रां रामाय नमः इति मन्त्रेण सम्प्रोक्ष्य धेनुमुद्रया अमृतीकृत्य तुलसीपत्राणि संस्थाप्य पूर्वापोशनपूर्वकं नैवेद्यं निवेदयेत् ।

## नैवेद्यमन्त्रः

नाभ्याऽऽसीदन्तरिक्षꣳ शीर्ष्णोद्यौःसमवर्तत ।
पद्म्याम्भूमिर्द्दिशःश्रोत्त्रात्तथालोकाँ२॥ आकल्पयन् ॥

पूपमोदकसंयावपयः पक्वादिकं वरम ।
निर्मितं बहुसंस्कारैर्नैवेद्यं प्रतिगृह्यताम् ॥

इति नैवेद्यं निवेदयामि ।
याः फलिनीर्याऽफलाऽपुष्पायाश्चपुष्पिणीः ।
बृहस्पतिप्रसूतास्तान्नोमुञ्चन्त्वꣳ हसः ॥

इदं फलं मया देव स्थापितं पुरतस्तव ।
तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि ॥

इति फलं समर्पयामि ।

## मङ्गलनीराजनं

पुनः घण्टानादं नादयन् आचमनीयं जलं समर्प्य करोद्वर्त्तनं कुर्यात् । ततः चामरव्यजनादिभिरुपचरन् शङ्ख-घण्टा-दुन्दुभिघोषपूर्वकं अलङ्कृतपञ्चवर्त्तिकाभिः नीराजनं कुर्यात् ।
चतुश्चरणयोः, द्विर्नाभौ, मुखे सकृत् कृत्वा सप्तभिः सर्वाङ्गे ॐकाराकृत्या परिभ्रामयेत् । तदनन्तरं पश्चिमादि दिशां तत्तद्देवान् तीर्थानि च संस्मृत्य परिक्रमाक्रमेण नीराजयेत् । पुनश्च देहलीस्थ देवान् संस्मृत्य ईषदवनम्य भूमिं च नीराजयेत् ।
पुनः वारत्रयं जलेन धौतवाससा च नीराजनं कुर्यात् । शङ्खोदकं वारत्रयं भ्रामयित्वा गरुडघण्टायां, नीराजनपात्रे ईषन्निक्षिप्य समुपस्थित भक्तजनान् अभिषिञ्चेत् ।
पुष्पाञ्जलिं विधाय अर्चकः चामरसेवां कुर्यात् ।

## जयघोषः

श्रीरामलला सरकार की जय ।
श्रीआनन्दकन्द भगवान् की जय ।
श्रीकौशल्यानन्दन भगवान् की जय ।
श्रीदशरथनन्दन भगवान् की जय ।
श्रीकैकयीनन्दन भगवान् की जय ।
श्रीसुमित्रानन्दन भगवान् की जय ।
श्री चारों भैयन की जय ।
श्रीहनुमान् जी महाराज की जय ।
श्रीरामजन्मभूमि की जय ।
श्रीकृष्णजन्म भूमि की जय ।
श्रीकाशीविश्वनाथ की जय ।
श्रीअयोध्या धाम की जय ।

श्रीसरयू महारानी की जय ।
जगद्गुरु स्वामी श्रीरामानन्दाचार्य जी महाराज की जय ।
गोस्वामी श्रीतुलसीदास जी महाराज की जय ।
समस्त पूर्वाचार्यों की जय ।
सर्वसन्तवैष्णव भगवान् की जय ।
सत्य सनातन धर्म की जय ।
गौ माता की जय ।
भारत माता की जय पुनः
मङ्गला आरती की जय जय श्रीसीताराम

## मङ्गलानुशासनं

मङ्गलानुशासनं कुर्यात् ।
ॐ नमो भगवते उत्तमश्लोकाय नम आर्यलक्षणशीलव्रताय नम उपशिक्षितात्मन उपासितलोकाय नमः साधुवादनिकषणाय नमो ब्रह्मण्यदेवाय महापुरुषाय महाराजाय नमः ॥

मङ्गलानीराजनानन्तरं समर्चनीयदेवस्य दक्षिणपार्श्वे समुपविश्य आग्नेयादारभ्य प्रदक्षिणक्रमेण, प्रक्षालित पाद्यार्घ्याचमनस्नानपात्राणि संस्थाप्य तेषां मध्ये शुद्धजलपात्रं निधाय तत्र
(१) दूर्वाविष्णुपर्णीपद्मश्यामकसहितं जलं पाद्यपात्रे (विष्णुपर्णी,कमल,तथा श्यामक सहित जल) निक्षिपेत् ।
(२) सर्षपाक्षतकुशाग्रतिलयवगन्धजायफलपुष्पसहितं जलं अर्घ्यपात्रे (सरसो, अक्षत, कुशाग्र, तिल, यव, गन्ध,जायफल फूल सहित शुद्ध छना हुआ जल) निक्षिपेत्
(३) एलालवङ्गकङ्कोलजातिसहितं जलमाचनपात्रे (इलायची, लवङ्ग, कङ्कोल, तथा जायफल सहित जल) निक्षिपेत् ।
(४) कोष्टमाजिष्ठहरिद्रामुस्ताशैलेयचम्पकवचकर्पूरलामज्जकसहितं जलं (कूठ, मजीठ, हल्दी, मोथा, छबीला, चम्पा, वच, कर्पूर तथा लामङ्क रस सहित जल) स्नानपात्रे निक्षिपेत् श्रीमन्त्रराजेन प्रत्येकं तत्तत्पात्रं सम्मन्त्र्य सुरभिमुद्रां च प्रदश्र्य वामपार्श्वे पूर्णकुम्भं निधाय अन्यानि पूजाद्रव्याणि दक्षिणपार्श्वे च निधाय मनसा स्वाचार्यं पाद्यादिभिः सम्पूज्यतद्धस्तेनैवाराधनं स्वीकार्यमिति भगवते विज्ञाप्य पूर्वस्थापितस्ववामपार्श्वस्थपूर्णकुम्भे श्रीराममन्त्रोच्चारणपूर्वकं तुलसीदलं निक्षिप्य श्रीमन्त्रराजेनैवाभिमन्त्र्य तज्जलेनपाद्यादिपञ्चपात्राणि षडक्षरमन्त्रोच्चारणपूर्वकं क्रमेण प्रपूर्य उद्धरण्यार्घ्यादि पञ्चपात्रेभ्यः किञ्चित्किञ्चित्तोयं समुद्धृत्य पूर्णकुम्भे निक्षिपेत् । तत उद्धरण्यार्घ्यसलिलमादाय नासाग्रपर्यन्तं ॐ विरजे आगच्छागच्छेति सप्तकृत्वा उक्त्वा तत्तोयेनात्मानं पूजोपकरणानि गर्भगृहभूमिं च प्रोक्ष्यापशिष्टमन्यत्र प्रक्षिपेत् ।

## ततस्तुलसीपुष्पाण्यादायः

ॐ अयोध्यानगरे रम्ये रत्नमण्डपमध्यगे ।
स्मरेत्कल्पतरोर्मूले रत्नसिंहासनं शुभम् ॥

तन्मध्येऽष्टदलं पद्मं नानारत्नैश्च वेष्टितम् ।
स्मरेन्मध्ये दाशरथिं सहस्रादित्यतेजसम् ॥

पितुरङ्कगतं राममिन्द्रनीलमणिप्रभम् ।
कोमलाङ्गं विशालाक्षं विद्युद्वर्णाम्बरावृतम् ॥

भानुकोटिप्रतीकाशं किरीटेन विराजितम् ।
रत्नग्रैवेयकेयूररत्नकुण्डलमण्डितम् ॥

रत्नकङ्कणमञ्जीरकटिसूत्रैरलङ्कृतम् ।
श्रीवत्सकौस्तुभोरस्कं मुक्ताहारोपशोभितम् ॥

दिव्यरत्नसमायुक्तं मुद्रिकाभिरलङ्कृतम् ।
राघवं द्विभुजं बालं राममीषत्स्मिताननम् ॥

तुलसीकुन्दमन्दारपुष्पमाल्यैरलङ्कृतम् ।
कर्पूरागुरुकस्तूरीदिव्यगन्धानुलेपनम् ॥

योगशास्त्रेष्वभिरतं योगेशं योगदायकम् ।
सदा भरतसौमित्रिशत्रुघ्नैरुपशोभितम् ॥

विद्याधरसुराधीशसिद्धगन्धर्वकिन्नरैः ।
योगीन्द्रैर्नारदाद्यैश्च स्तूयमानमहर्निशम् ॥

विश्वामित्रवसिष्ठादिमुनिभिः परिसेवितम् ।
सनकादिमुनिश्रेष्ठैर्योगिवृन्दैश्च सेवितम् ॥

रामं रघुवरं वीरं धनुर्वेदविशारदम् ।
मङ्गलायतनं देवं रामं राजीवलोचनम् ॥

सर्वशास्त्रार्थतत्त्वज्ञमानन्दकरसुन्दरम् ।
कौसल्यानन्दनं रामं धनुर्बाणधरं हरिम् ॥

विज्ञानहेतुं विमलायताक्षं प्रज्ञानरूपं स्वसुखैकहेतुम् ।
श्रीरामचन्द्रं हरिमादिदेवं परात्परं राममहं भजामि ॥

इति पद्यैरित्थमनुसन्धाय भगवच्छ्रीरामचन्द्रचरणारविन्दे समर्पयेत् ।
अथाधारादीन् संस्मृत्य पूजयेत्
ॐ आधारशक्त्यै नमः आधार शक्त्यै पाद्यार्घ्यादीनि समर्पयामि । ॐ प्रकृत्यै नमः प्रकृत्यै पाद्यार्घ्यादीनि समर्पयामि । ॐ अखिलजगदाधाराय कूर्मरूपिणे नारायणाय नमः इति अखिलजगदाधाराय कूर्मरूपिणे नारायणाय पाद्यार्घ्यादीनि समर्पयामि । ॐ भगवतेऽनन्ताय नागराजाय नमः भगवतेऽनन्ताय नागराजाय पाद्यार्घ्यादीनि समर्पयामि । ॐ भूम्यै नमः भूम्यै पाद्यार्घ्यादीनि समर्पयामि । ॐ श्रीसाकेताय दिव्यनगराय नमः साकेताय दिव्यनगराय पाद्यार्घ्यादीनि समर्पयामि । ॐ पुष्पकाय दिव्यविमानाय नमः पुष्पकाय दिव्यविमानाय पाद्यार्घ्यादीनि समर्पयामि । ॐ अष्टचक्रायै श्रीअयोध्यायै नमः अष्टचक्रायै श्रीअयोध्यायै पाद्यार्घ्यादीनि समर्पयामि । ॐआनन्दमयदिव्यरत्नमण्डपाय नमः आनन्दमयदिव्यरत्नमण्डपाय पाद्यार्घ्यादीनि समर्पयामि । ॐआस्तरणभूताय अनन्ताय नमः आस्तरणभूताय अनन्ताय पाद्यार्घ्यादीनि समर्पयामि ।

## ततः अधोलिखितैः मन्त्रैर्देवान् कल्पयित्वा पाद्यार्घ्यादीनि समर्पयेत्

आग्नेय्यां दिशि ॐ धर्माय पीठपादाय नमः पाद्यार्घ्यादीनि समर्पयामि । नैरृत्यां ॐ ज्ञानाय पीठपादाय नमः पाद्यार्घ्यादीनि समर्पयामि । वायव्यां ॐ वैराग्याय पीठपादाय नमः पाद्यार्घ्यादीनि समर्पयामि । ऐशान्यां ॐ ऐश्वर्याय पीठपादाय नमः पाद्यार्घ्यादीनि समर्पयामि । मध्ये ॐ पीठभूताय अनन्ताय नागराजाय नमः पाद्यार्घ्यादीनि समर्पयामि । प्राच्यां ॐ अधर्माय पीठगात्राय नमः पाद्यार्घ्यादीनि समर्पयामि । दक्षिणस्यां ॐ अज्ञानाय पीठगात्राय नमः पाद्यार्घ्यादीनि समर्पयामि । पश्चिमायां ॐ अवैराग्याय पीठगात्राय नमः पाद्यार्घ्यादीनि समर्पयामि । उत्तरस्यां ॐ अनैश्वर्याय पीठगात्राय नमः पाद्यार्घ्यादीनि समर्पयामि । एभिः परिच्छिन्नतत्त्वसदसदात्मकाय नमः पाद्यार्घ्यादीनि समर्पयामि । ॐ ऋग्वेदाय पीठवाहकाय नमः पाद्यार्घ्यादीनि समर्पयामि । ॐ यजुर्वेदाय पीठवाहकाय नमः पाद्यार्घ्यादीनि समर्पयामि । ॐ सामवेदाय पीठवाहकाय नमः पाद्यार्घ्यादीनि समर्पयामि । ॐ अथर्ववेदाय पीठवाहकाय नमः पाद्यार्घ्यादीनि समर्पयामि । इत्थं गन्धपुष्पादिभिस्तानभ्यर्च्य प्रणमेत् ।
पुनश्च पीठवाहकोपरि - ॐ परिच्छिन्नतनवे पीठभूताय शुद्धात्मकायाऽनन्ताय नागराजाय नमः इति तस्मै पाद्यार्घ्यादीनि समर्पयामि । तत्रानन्तोपरि ॐ अष्टदल पद्माय नमः इति तस्मै पाद्यार्घ्यादीनि समर्पयामि । तद्दलेषु ॐ सूर्याय नमः पाद्यार्घ्यादीनि समर्पयामि । केशरेषु ॐ सं सोममण्डलाय नमः पाद्यार्घ्यादीनि समर्पयामि । कर्णिकायां ॐ रं वह्निमण्डलाय नमः पाद्यार्घ्यादीनि समर्पयामि । इति मण्डलत्रयं ध्यात्वा पद्मस्य पूर्वपार्श्वदले अष्टशक्तीभ्यः

पाद्यार्घ्यादीनि समर्पयामि । ॐ विमलायै चामरहस्तायै नमः इति तस्यै पाद्यार्घ्यादीनि समर्पयामि । पद्मस्याग्निकोणे ॐ उत्कर्षिण्यै चामरहस्तायै नमः इति पाद्यार्घ्यादीनि समर्पयामि । पद्मस्य दक्षिणदले ॐ ज्ञानरूपायै चामरहस्तायै नमः पाद्यार्घ्यादीनि समर्पयामि । पद्मस्य नैरृत्यदले ॐ क्रियायै चामरहस्तायै नमः पाद्यार्घ्यादीनि समर्पयामि । पद्मस्य पश्चिमदले ॐ योगायै चामरहस्तायै नमः पाद्यार्घ्यादीनि समर्पयामि । पद्मस्य वायव्यदले ॐ सत्यायै चामरहस्तायै नमः पाद्यार्घ्यादीनि समर्पयामि । पद्मस्योत्तरदले ॐ प्रह्व्यै चामरहस्तायै नमः पाद्यार्घ्यादीनि समर्पयामि । पद्मस्येशानदले ॐ ऐशान्यै चामरहस्तायै नमः पाद्यार्घ्यादीनि समर्पयामि ।

पुनश्च-भगवतोऽग्रे कर्णिकायाः पूर्वभागे ॐ अनुग्रहायै नमः पाद्यार्घ्यादीनि समर्पयामि । पद्मस्य कर्णिकायां ॐ जगत्प्रकृतये दिव्ययोगपीठवाहकाय नमः पाद्यार्घ्यादीनि समर्पयामि । ॐ दिव्ययोगपीठ वाहकोपरि ॐ दिव्ययोगपीठाय नमः पाद्यार्घ्यादीनि समर्पयामि । योगपीठे ॐ दिव्ययोगपर्यङ्काय नमः पाद्यार्घ्यादीनि समर्पयामि । पर्यङ्कोपरि ॐ सहस्रफणशोभिताय नमः पाद्यार्घ्यादीनि समर्पयामि । पुरो ॐ भगवत्पादपीठाय नमः पाद्यार्घ्यादीनि समर्पयामि । तदुपरि ॐ भगवत्पादुकाभ्यां नमः पाद्यार्घ्यादीनि समर्पयामि ।

अथ यन्त्रोपरि भगवन्तं संस्थाप्य आसनं कल्पयेत् ।

अथ तादृशाष्टदलपद्मस्थपर्यङ्कस्थितानन्तोपरि ।

प्रपन्नाभीष्टसन्दोह श्रीराम! करुणानिधे! शिवशेषाद्यविज्ञेयाशेषमाहात्म्य राघव ! सभ्रातृभिस्समागच्छ पार्षदेन सह प्रभो ! आज्ञापयस्व दासं मामर्चायै शरणागतम् ॥

इति सानुजमप्रमेयकृपारत्नाकरं भगवन्तं साङ्गं सायुधं सपरिकरं सवाहनं सशक्तिकं श्रीरामचन्द्रमावाह्य पुष्पाञ्जलिं च तस्मै प्रदाय पूर्वस्थापितार्घ्यपात्रात् उद्धरण्यार्घ्यजलमादाय पाद्यं समर्पयेत् ।

## अथ पाद्यमन्त्रः

एतावानस्यमहिमातोज्यायाँश्चपूरुषः ।
पादोऽस्यविश्वाभूतानित्रिपादस्यामृतन्दिवि ॥

ॐ रां रामाय नमः अप्रमेयकृपारत्नाकराय भगवते श्रीरामचन्द्राय नमः पाद्यं समर्पयामि । इत्युक्त्वा भगवतः पादौ प्रक्षाल्य अर्घ्यं समर्पयेत् ।

## अथार्घ्यमन्त्रः

त्रिपादूर्ध्वऽउदैत्पुरुषःपादोस्येहाभवत्पुनः ।

ततोव्विष्ष्वङ्व्व्यक्क्रामत्साशनानशनेऽअभि ॥

ॐ रां रामाय नमः अप्रमेयकृपारत्नाकराय भगवते श्रीरामचन्द्राय नमः अर्घ्यं समर्पयामि । इत्युक्त्वा भगवतः दक्षिण हस्तं सम्प्रोक्ष्य आचमनीयं जलं समर्पयेत् ।

## अथाचमनमन्त्रः

ततोव्विराडजायतव्विराजोऽअधिपूरुषः ।
सजातोऽअत्त्यरिच्च्यतपश्चाद्भूमिमथोपुरः ॥

ॐ रां रामाय नमः अप्रमेयकृपारत्नाकराय भगवते श्रीरामचन्द्राय नमः आचमनीयं जलं समर्पयामि । इत्युक्त्वा आचमनीयं समर्प्य शुभ्रवस्त्रेण भगवतः शुभाङ्गानि सम्मृज्य मधुपर्कं समर्पयेत् । तत्र विधिः - रत्नखचितस्वर्णपात्रे दधि-मधु-घृतमिश्रितमधुपर्कं भगवतः पुरतः संस्थाप्य मधुपर्क मन्त्रः पठेत् ।

## मधुपर्कमन्त्रः

ॐ यन्मधुनो मधव्व्यं परमं रूपमन्नाद्यम् ।
तेनाहं मधुनो मधव्येन परमेण रूपेणान्नाद्येन परमो मधव्योऽन्नादोऽसानि ।
ॐ रां रामाय नमः अप्रमेयकृपारत्नाकराय भगवते श्रीरामचन्द्राय नमः मधुपर्कं समर्पयामि ।
पुनः रां रामाय नमः अप्रमेयकृपारत्नाकराय भगवते श्रीरामचन्द्राय नमः इत्युक्त्वा आचमनीयं जलं समर्प्य शुभ्रवस्त्रेण मुखं सम्प्रोक्षयेत् ।

## अथस्नानं

स्नानपात्राज्जलमादाय भगवन्तं स्नापयन् मन्त्रमुच्चरेत् ॥

## स्नानमन्त्रः

तस्माद्यज्ञात्सर्व्वहुतःसम्भृतम्पृषदाज्यम् ।
पशूँस्ताँश्चक्रेव्वायव्व्यानारण्याग्ग्राम्याश्चये ॥

## अथ दुग्धस्नानम्

ॐ पयःपृथिव्व्याम्पयऽओषधीषुपयोदिव्व्यन्तरिक्षेपयोधाः ।

पयस्वतीःप्रदिशःसन्तुमह्यम् ॥

कामधेनुसमुद्भूतं सर्वेषां जीवनं परम् ।
पावनं यज्ञहेतुश्च पयः स्नानार्थमर्पितम् ॥

ॐ रां रामाय नमः अप्रमेयकृपारत्नाकराय भगवते श्रीरामचन्द्राय नमः पयस्नानं समर्पयामि । पयस्नानान्ते शुद्धोदकस्नानं समर्पयामि । शुद्धोदकस्नानान्ते द्विराचमनीयं जलं समर्पयामि

## अथ दधिस्नानम्

ॐ दधिक्राव्ण्णोऽकारिषञ्जिष्णोरश्वस्यव्वाजिनः ।
सुरभिनोमुखाकरत्प्रणऽयूँ षितारिषत् ॥

पयसस्तु समुद्भूतं मधुराम्लं शशिप्रभम् ।
दध्यानीतं मया देव! स्नानार्थं प्रतिगृह्यताम् ॥

ॐ रां रामाय नमः अप्रमेयकृपारत्नाकराय भगवते श्रीरामचन्द्राय नमः दधिस्नानं समर्पयामि । दधिस्नानान्ते शुद्धोदकस्नानं समर्पयामि । शुद्धोदकस्नानान्ते द्विराचमनीयं जलं समर्पयामि ।

## अथ घृतस्नानम्

ॐ घृतम्मिमिक्षेघृतमस्ययोनिर्घृतेश्रितोघृतम्वस्यधाम ।
अनुष्वधमावहमादयस्वस्वाहाकृतम्व्वृषभव्वक्षिहव्व्यम् ॥

नवनीतसमुत्पन्नं सर्वसन्तोषकारकम् ।
घृतं तुभ्यं प्रदास्यामि स्नानार्थं प्रतिगृह्यताम् ॥

ॐ रां रामाय नमः अप्रमेयकृपारत्नाकराय भगवते श्रीरामचन्द्राय नमः घृतस्नानं समर्पयामि । घृतस्नानान्ते शुद्धोदकस्नानं समर्पयामि । शुद्धोदकस्नानान्ते द्विराचमनीयं जलं समर्पयामि ॥

## अथ मधुस्नानम्

ॐ मधुव्वाताऽऋतायतेमधुक्षरन्तिसिन्धवः ।
माध्वीर्न्नःसन्त्वोषधीः ।
मधुनक्तमुतोषसोमधुमत्पार्थिवँ रजः ।
मधुद्यौरस्तुनःपिता ।
मधुमान्नोव्वनस्पतिर्म्मधुमाँ२.अ ॥

अस्तुसूर्यः ॥

माध्वीर्ग्गावोभवन्तुनः ॥

पुष्परेणुसमुद्भूतं सुस्वादु मधुरं मधु ।
तेजः पुष्टिकरं दिव्यं स्नानार्थं प्रतिगृह्यताम् ॥

ॐ रां रामाय नमः अप्रमेयकृपारत्नाकराय भगवते श्रीरामचन्द्राय नमः मधुस्नानं समर्पयामि । मधुस्नानान्ते शुद्धोदकस्नानं समर्पयामि । शुद्धोदकस्नानान्ते द्विराचमनीयं जलं समर्पयामि

## अथ शर्करास्नानम्

ॐ अपाँ ऽँ रसमुद्वयस ऽँ सूर्ये ऽँ सन्त ऽँ समाहितम् ।
अपा ऽँ रसस्ययोरसस्तंव्वो गृह्णाम्युत्तममुपयामगृहीतोऽसीन्द्रायत्वाजुष्टङ्गृह्णाम्येषतेयोनिरिन्द्रायत्वाजुष्टतमम् ॥

इक्षुरससमुद्भूतां शर्करां पुष्टिदां शुभाम् ।
मलापहारिकां दिव्यां स्नानार्थं प्रतिगृह्यताम् ॥

ॐ रां रामाय नमः अप्रमेयकृपारत्नाकराय भगवते श्रीरामचन्द्राय नमः शर्करास्नानं समर्पयामि । शर्करास्नानान्ते शुद्धोदकस्नानं समर्पयामि । शुद्धोदकस्नानान्ते द्विराचमनीयं जलं समर्पयामि

## अथ पञ्चामृतस्नानं

दुग्धदधिघृतमधुशर्करासम्मिश्रितपञ्चामृतेन भगवन्तं स्नापयेत् । पञ्चनद्यःसरस्वतीमपियन्तिसस्रोतसः ॥

सरस्वतीतुपञ्चधासोदेशेऽभवत्सरित् ॥

ॐ रां रामाय नमः अप्रमेयकृपारत्नाकराय भगवते श्रीरामचन्द्राय नमः पञ्चामृतस्नानं समर्पयामि । पञ्चामृतस्नानान्ते शुद्धोदकस्नानं समर्पयामि ।

## अथ शुद्धोदकस्नानम्

ॐ शुद्धवालःसर्व्वशुद्धवालोमणिवालस्तऽश्विनाःश्येतःश्येताक्षोरुणस्तेरुद्रायपशुपतये कर्ण्णायामाऽवलिप्तारौद्रानभोरूपाःपार्जन्याः ॥

शुद्धोदकस्नानान्ते द्विराचमनीयं जलं समर्पयामि ।

## अथ गन्धोदकस्नानम्

ॐ अꣳ शुनातेऽꣳ शुः पृच्यताम्परुषापरुः ।
गन्धस्तेसोममवतुमदायरसोऽच्युतः ॥

मलयाचलसम्भूतचन्दनेन विमिश्रतम् ।
इदं गन्धोदकस्नानं कुङ्कुमाक्तं प्रगृह्यताम् ॥

ॐ रां रामाय नमः अप्रमेयकृपारत्नाकराय भगवते श्रीरामचन्द्राय नमः गन्धोदकस्नानं समर्पयामि । गन्धोदकस्नानान्ते शुद्धोदकस्नानं समर्पयामि । शुद्धोदकस्नानान्ते द्विराचमनीयं जलं समर्पयामि

## अथोद्वर्त्तनं

गन्धर्व्वस्त्वाविश्वावसुः परिदधातुविश्वस्यारिष्ट्यैयजमानस्यपरिधिरस्यग्निरिडऽईडितः ॥

चन्दनं मलयोद्भूतं कस्तूर्यादिसमन्वितम् ।
करोद्वर्तनकं देव गृहाण परमेश्वर ॥

ॐ रां रामाय नमः अप्रमेयकृपारत्नाकराय भगवते श्रीरामचन्द्राय नमः उद्वर्तस्नानं समर्पयामि । उद्वर्तस्नानान्ते शुद्धोदकस्नानं समर्पयामि । शुद्धोदकस्नानान्ते द्विराचमनीयं जलं समर्पयामि

## अथाभिषेकः

पुरुषसूक्तमन्त्रैः शङ्खेनाविच्छिन्नधारया भगवतः अभिषेकं कुर्यात् ।
ॐ सहस्रशीर्षापुरुषःसहस्राक्षःसहस्रपात् ।
सभूमिꣳ सर्व्वतस्पृत्वात्यतिष्ठद्दशाङ्गुलम् ।
पुरुषऽएवेदꣳ सर्व्वंयद्भूतंयच्चभाव्व्यम् ।
उतामृतत्वस्येशानोयदन्नेनातिरोहति ।
एतावानस्यमहिमातोज्यायाँश्चपूरुषः ।
पादोस्यव्विश्वाभूतानित्रिपादस्यामृतन्दिवि ।
त्रिपादूर्ध्वऽउदैत्पुरुषःपादोस्येहाभवत्पुनः ।
ततोव्विष्ष्वङ्व्व्यक्रामत्साशनानशनेऽभि ।
ततोव्विराडजायतव्विराजोऽधिपूरुषः ।
सजातोऽत्त्यरिच्यतपश्चाद्भूमिमथोपुरः ॥

तस्माद्यज्ञात्सर्व्वहुतःसम्भृतम्पृषदाज्यम् ।
पशूँस्ताँश्चक्रेव्वायव्व्यानारण्याग्ग्राम्याश्चये ॥
तस्माद्यज्ञात्सर्व्वहुतःऽऋचःसामानिजज्ञिरे ।
छन्दाꣳसिजज्ञिरेतस्माद्यजुस्तस्मादजायत ।
तस्मादश्वाऽजायन्तयेकेचोभयादतः ।
गावोहजज्ञिरेतस्मात्तस्माज्जाताऽजावयः ।
तंयज्ञम्बर्हिषिप्प्रौक्षन्पुरुषञ्जातमग्रतः ।
तेनदेवाऽयजन्तसाध्याऽऋषयश्चये ।
यत्पुरुषंव्व्यदधुःकतिधाव्व्यकल्पयन् ।
मुखङ्किमस्यासीत्किम्बाहूकिमूरूपादाऽउच्च्येते ।
ब्राह्मणोऽस्यमुखमासीत्बाहूराजन्यःकृतः ।
ऊरूतदस्ययद्वैश्यःपद्ध्याꣳशूद्रोऽजायत ।
चन्द्रमामनसोजातश्चक्षोःसूर्योऽजायत ।
श्रोत्त्राद्वायुश्चप्प्राणश्चमुखादग्निरजायत ।
नाभ्याऽसीदन्तरिक्षꣳशीर्ष्णोद्यौःसमवर्तत ।
पद्ध्याम्भूमिर्द्दिशःश्रोत्रात्तथालोका२॥ आकल्पयन् ।
यत्पुरुषेणहविषादेवायज्ञमतन्वत ।
व्वसन्तोस्यासीदाज्यङ्ग्ग्रीष्मऽइध्मःशरद्धविः ।
सप्तास्यासन्परिधयस्त्रिःसप्तसमिधःकृताः ।
देवायद्यज्ञन्तन्वानाऽबध्नन्पुरुषम्पशुम् ।
यज्ञेनयज्ञमयजन्तदेवास्तानिधर्म्माणिप्प्रथमान्यासन् ।
तेहनाकंमहिमानःसचन्तयत्रपूर्व्वेसाध्याःसन्तिदेवाः ।

## अथ शुद्धोदकस्नानम्

ॐ शुद्धवालःसर्व्वशुद्धवालोमणिवालस्तऽश्विनाःश्येतःश्येताक्षोरुणस्तेरुद्रायपशुपतये कर्ण्णायामाऽवलिप्तारौद्रानभोरूपाःपार्जन्याः ॥

शुद्धोदकस्नानान्ते द्विराचमनीयं जलं समर्पयामि ।

## ततः पात्रावशिष्टजलेन यन्त्रस्थितभगवद्भूषणानि पाद्यादिभिरभ्यर्चेत्-

ॐ किरीटाय मुकुटाधिपतये नमः पाद्यार्घ्यादीनि समर्पयामि । ॐ दक्षिणकुण्डलाय मकरात्मने नमः पाद्यार्घ्यादीनि समर्पयामि । ॐ वामकुण्डलाय मकरात्मने नमः पाद्यार्घ्यादीनि समर्पयामि । ॐ वैजयन्तीमालायै श्रीतुलस्यै नमः पाद्यार्घ्यादीनि समर्पयामि । ॐ वत्साय श्रीनिवासाय नमः पाद्यार्घ्यादीनि समर्पयामि । ॐ कौस्तुभायरत्नाधिपतये नमः पाद्यार्घ्यादीनि समर्पयामि । ॐ काञ्चीगुणोज्ज्वलाय दिव्यपीताम्बराय नमः पाद्यार्घ्यादीनि समर्पयामि । ॐ सर्वेभ्यो भगवद्दिव्यविभूषणेभ्यो नमः पाद्यार्घ्यादीनि समर्पयामि । इति भगवद्भूषणानि पाद्यादिभिरभ्यर्चेत् ।

ततः पाद्यार्घ्याद्येकैकपात्रस्थ जलेन क्रमशः भगवतो दिव्यायुधान्यभ्यर्चेत् । ॐ शार्ङ्गाय सबाणाय चापाधिपतये नमः पाद्यार्घ्यादीनि समर्पयामि । ॐ सुदर्शनाय हेतिराजाय नमः पाद्यार्घ्यादीनि समर्पयामि । ॐ पाञ्चजन्याय शङ्खाधिपतये नमः पाद्यार्घ्यादीनि समर्पयामि । ॐ कौमोदक्यै गदाधिपतये नमः पाद्यार्घ्यादीनि समर्पयामि । ॐ नन्दकाय खड्गाधिपतये नमः पाद्यार्घ्यादीनि समर्पयामि । इति भगवतो दिव्यायुधानि पाद्यादिभिरभ्यर्चेत् ।

ततस्तथैव भगवत्परिकरान् पाद्यार्घ्याद्येकैकपात्रस्थ जलेन क्रमशः अभ्यर्चेत् । ॐ लं लक्ष्मणाय नमः पाद्यार्घ्यादीनि समर्पयामि । ॐ भं भरताय नमः पाद्यार्घ्यादीनि समर्पयामि । ॐ शं शत्रुघ्नाय नमः पाद्यार्घ्यादीनि समर्पयामि । ॐ हं हनुमते नमः पाद्यार्घ्यादीनि समर्पयामि । ॐ सुं सुग्रीवाय नमः पाद्यार्घ्यादीनि समर्पयामि । ॐ विं विभीषणाय नमः पाद्यार्घ्यादीनि समर्पयामि । ॐ जां जाम्बवते नमः पाद्यार्घ्यादीनि समर्पयामि । ॐ नं नलाय नमः पाद्यार्घ्यादीनि समर्पयामि । ॐ नीं नीलाय नमः पाद्यार्घ्यादीनि समर्पयामि । ॐ गं गवाक्षाय नमः पाद्यार्घ्यादीनि समर्पयामि । ॐ कें केसरिणे नमः पाद्यार्घ्यादीनि समर्पयामि । ॐ सुं सुषेणाय नमः पाद्यार्घ्यादीनि समर्पयामि । ॐ सर्वेभ्यो भगवत्परिकरेभ्यो नमः पाद्यार्घ्यादीनि समर्पयामि । इति भगवत्परिकरान्पाद्यादिभिरभ्यर्चेत् ।

ततस्तथैव भगवतो द्वारपालान् पाद्यार्घ्याद्येकैकपात्रस्थ जलेन क्रमशः अभ्यर्चेत् । पूर्वे ॐ ऋक्षराजाय नमः पाद्यार्घ्यादीनि समर्पयामि । ॐ नीलाय नमः पाद्यार्घ्यादीनि समर्पयामि । दक्षिणे ॐ सुग्रीवाय नमः पाद्यार्घ्यादीनि समर्पयामि । ॐ नलाय नमः पाद्यार्घ्यादीनि समर्पयामि । पश्चिमे ॐ शत्रुघ्नाय नमः पाद्यार्घ्यादीनि समर्पयामि । ॐ अङ्गदाय नमः पाद्यार्घ्यादीनि समर्पयामि । उत्तरे ॐ भरताय नमः पाद्यार्घ्यादीनि समर्पयामि । ॐ विभीषणाय नमः पाद्यार्घ्यादीनि समर्पयामि । भगवतोऽग्रे ॐ आञ्जनेयाय महाबलाय हं हनुमते नमः पाद्यार्घ्यादीनि समर्पयामि । भगवतः पृष्ठे ॐ लं लक्ष्मणाय नमः पाद्यार्घ्यादीनि समर्पयामि । ॐ सर्वेभ्यो भगवद्द्वारपालेभ्यो नमः पाद्यार्घ्यादीनि समर्पयामि । इति भगवतो द्वारपालान्पाद्यादिभिरभ्यर्चेत् ।

ततस्तथैव भगवदङ्गदेवान् पाद्यार्घ्याद्येकैकपात्रस्थ जलेन क्रमशः अभ्यर्चैत् । ॐ श्रीविघ्नेशाय नमः पाद्यार्घ्यादीनि समर्पयामि । ॐ श्रीवाण्यै नमः पाद्यार्घ्यादीनि समर्पयामि । ॐ श्रीदुर्गायै नमः पाद्यार्घ्यादीनि समर्पयामि । ॐ श्रीक्षेत्रपालाय नमः पाद्यार्घ्यादीनि समर्पयामि । ॐ श्रीसूर्याय नमः पाद्यार्घ्यादीनि समर्पयामि । ॐ श्रीचन्द्राय नमः पाद्यार्घ्यादीनि समर्पयामि । ॐ श्रीनारायणाय नमः पाद्यार्घ्यादीनि समर्पयामि । ॐ श्रीनरसिंहाय नमः पाद्यार्घ्यादीनि समर्पयामि । ॐ श्रीवासुदेवाय नमः पाद्यार्घ्यादीनि समर्पयामि । ॐ श्रीवराहाय नमः पाद्यार्घ्यादीनि समर्पयामि । इत्यङ्गदेवान् सम्पूज्य

ॐ श्रीसीतायै नमः पाद्यार्घ्यादीनि समर्पयामि ।

ॐ श्रीलक्ष्मणाय नमः पाद्यार्घ्यादीनि समर्पयामि ।

ॐ श्रीहनुमते नमः पाद्यार्घ्यादीनि समर्पयामि ।

ॐ श्रीभरताय नमः ०म् । ॐ श्रीशत्रुघ्नाय नमः ।

ॐ श्रीविभीषणाय नमः ०म् । ॐ श्रीसुग्रीवाय नमः ॐ पाद्यार्घ्यादीनि समर्पयामि । ॐ श्रीअङ्गदाय नमः ०म् ।

ॐ श्रीजाम्बवते नमः ०म् । ॐ श्रीप्रणवाय नमः पाद्यार्घ्यादीनि समर्पयामि । इत्यङ्गमन्त्रान् प्रपूजयेत् ।

ततस्तथैव भगवत्पार्षदादीनि पाद्यार्घ्याद्येकैकपात्रस्थ जलेन क्रमशः अभ्यर्चैत् । ॐ सर्वेभ्यो भगवद्गणाधिपेभ्यो नमः पाद्यार्घ्यादीनि समर्पयामि । ॐ सर्वेभ्यो भगवत्पार्षदेभ्यो नमः पाद्यार्घ्यादीनि समर्पयामि । सर्वेभ्यो भगवत्परिकरेभ्यो नमः पाद्यार्घ्यादीनि समर्पयामि । ॐ नीत्यै नमः पाद्यार्घ्यादीनि समर्पयामि । ॐ मुक्त्यै नमः पाद्यार्घ्यादीनि समर्पयामि । साङ्गाय सायुधाय सपरिकराय दिव्यमङ्गलमूर्तये नमः पाद्यार्घ्यादीनि समर्पयामि ।

ततः शुभ्रवस्त्रेण सर्वाण्यङ्गानि सम्मृज्य सिंहासने संस्थाप्य भगवन्तं वस्त्राणि समर्पयेत् ।

## अथ वस्त्रमन्त्रः

तस्मा᳚द्य॒ज्ञात्स॑र्व्वहुत॑ःऽऋच॒ःसामा॑निजज्ञिरे ।

छन्दा ꣳ सिजज्ञि॒रेतस्मा᳚द्यजु॒स्तस्मा॑दजायत ।

सन्तप्तकाञ्चनप्रख्यं पीताम्बरमिदं हरे ।

सङ्गृहाण जगन्नाथ रामचन्द्र नमोऽस्तुते ॥

ॐ रां रामाय नमः अप्रमेयकृपारत्नाकराय भगवते श्रीरामचन्द्राय नमः वस्त्रं समर्पयामि । वस्त्रान्ते द्विराचमनीयं जलं समर्पयामि ।

## अथ यज्ञोपवीतम्

तस्मादश्वाऽजायन्तयेकेचोभयादतः ।
गावोहजज्ञिरेतस्मात्तस्माज्जाताऽजावयः ।
यज्ञोपवीतं सौवर्णं मया दत्तं रघूत्तम ।
गृहाण सुमुखो भूत्वा प्रसीद करुणानिधे ॥

ॐ रां रामाय नमः अप्रमेयकृपारत्नाकराय भगवते श्रीरामचन्द्राय नमः वस्त्रं समर्पयामि । यज्ञोपवीतान्ते द्विराचमनीयं जलं समर्पयामि ।

## अथाभूषणपूजनं

गन्धपुष्पैः केयूरकिरीटादीनि सम्पूज्य भगवन्तमलङ्कुर्यात् ।

### श्लोकः

मणीन्दुगर्भं मुकुटाधिनाथं श्रीमत्किरीटं मणिकुण्डले च ।
श्रीकौस्तुभादीनि च दिव्यभूषणान्येतानि नित्यं प्रणमामि विष्णोः ॥

## अथाभूषणधारणं

हिरण्यपाणिःसविताविचर्षणिरुभेद्यावापृथिवीऽन्तरीयते ।
अपामीवांबाधतेव्वेतिसूर्यमभिकृष्णेनरजसाद्यामृणोति ॥

किरीटं कुण्डलं हारं कङ्कणाऽङ्गदनूपुरम् ।
नानारत्नमयं दिव्यं भूषणं प्रतिगृह्यताम् ॥

ॐ रां रामाय नमः अप्रमेयकृपारत्नाकराय भगवते श्रीरामचन्द्राय नमः आभूषणानि समर्पयामि ।

## अथ चन्दनम्

तंयज्ञम्बर्हिषिप्प्रौक्षन्पुरुषञ्जातमग्रतः ।
तेनदेवाऽयजन्तसाध्याऽऋषयश्चये ।
मलयाचल सम्भूतं शीतमानन्दवर्द्धनम् ।
काश्मीरघनसाराढ्यं चन्दनं प्रतिगृह्यताम् ॥

ॐ रां रामाय नमः अप्रमेयकृपारत्नाकराय भगवते श्रीरामचन्द्राय नमः चन्दनं समर्पयामि ।

## अथ तुलसीदलसमर्पणम्

श्रीश्चतेलक्ष्मीश्चपत्न्यावहोरात्रेपार्श्वेनक्षत्राणिरूपमश्विनौव्यात्तम् ।
इष्णन्निषाणामुम्मऽइषाणसर्व्वलोकम्मऽइषाण ।
कोमलानि सुगन्धीनि मञ्जरी संयुतानि च ।
तुलस्याः सुदलान्येव गृहाण रघुवल्लभ ॥

ॐ रां रामाय नमः अप्रमेयकृपारत्नाकराय भगवते श्रीरामचन्द्राय नमः तुलसीदलानि समर्पयामि ।

## अथ पुष्पमाल्यम्

यत्पुरुषंव्व्यदधुःकतिधाव्व्यकल्पयन् ।
मुखङ्किमस्यासीत्किम्बाहूकिमूरूपादाऽउच्च्येते ।
सौरभाणि सुमाल्यानि सुपुष्परचितानि च ।
नानाविधानि पुष्पाणि गृह्यतां करुणानिधे ॥

ॐ रां रामाय नमः अप्रमेयकृपारत्नाकराय भगवते श्रीरामचन्द्राय नमः पुष्पं - पुष्पमालाञ्च समर्पयामि ।

## अथाङ्गपूजा

तुलसीदलैः प्रत्यङ्गं विभाव्य भगवन्तं पूजयेत् ।
ॐ श्रीरामचन्द्राय नमः पादौ पूजयामि । ॐ सृष्ट्यादिकारणाय नमः गुल्फौ पूजयामि ।
ॐ रावणान्तकाय नमः ऊरू पूजयामि । ॐ विश्वरूपाय नमः जङ्घे पूजयामि । ॐ लक्ष्मणाग्रजाय नमः कटिं पूजयामि । ॐ विश्वामित्रप्रियाय नमः नाभिं पूजयामि । ॐ सर्वशोषिणे नमः उदरं पूजयामि । ॐ परमात्मने नमः हृदयं पूजयामि । ॐ सुकण्ठमित्राय नमः कण्ठं पूजयामि । ॐ धनुर्बाणधारिणे नमः बाहू पूजयामि । ॐ दिव्यदेहाय नमः मुखं पूजयामि । ॐ पद्मनाभाय नमः जिह्वां पूजयामि । ॐ दाशरथये नमः दन्तान् पूजयामि । ॐ मेघश्यामाय नमः कपोलौ पूजयामि । ॐ शिवमानसहंसाय नमः नासिकां पूजयामि । ॐ श्रुतिगोचराय नमः कर्णौ पूजयामि । ॐ पुण्डरीकाक्षाय नमः नेत्रे पूजयामि । ॐ श्रीसीतापतये नमः ललाटं पूजयामि । ॐ ज्ञानगम्याय

नमः शिरः पूजयामि । ॐ सर्वाभीष्टप्रदाय नमः पृष्ठं पूजयामि । ॐ सर्वात्मने नमः सर्वाङ्गं पूजयामि । नमः श्रीजानकीनाथ सौन्दर्यादिगुणाम्बुधे । पादगुल्फादिस्वङ्गेषु ह्यङ्गपूजां गृहाण मे ॥ ॐ रां रामाय नमः अप्रमेयकृपारत्नाकराय भगवते श्रीरामचन्द्राय नमः अङ्गपूजां समर्पयामि ।

## अथ सुगन्धिद्रव्यम्

ॐ त्र्यम्बकंयजामहेसुगन्धिम्पुष्टिवर्धनम् ।
उर्व्वारुकमिवबन्धनान्मृत्योर्मुक्षीयमामृतात् ॥

प्रधानपुष्प साराढ्यस्तव पूजनकर्मणि ।
प्रगृह्यतां दीनबन्धो ! गन्धोऽयं मङ्गलप्रद ॥

ॐ रां रामाय नमः अप्रमेयकृपारत्नाकराय भगवते श्रीरामचन्द्राय नमः सुगन्धिद्रव्यं समर्पयामि ।

ततः भगवतः पुरतः चतुष्कोणमण्डलमध्ये नैवेद्यं संस्थाप्य धूपमाघ्रापयेत् ।

## अथधूपमन्त्रः

ब्राह्मणोऽस्यमुखमासीत्बाहूराजन्यःकृतः ।
ऊरूतदस्ययद्वैश्यःपद्भ्याँ शूद्रोऽजायत ।
वनस्पतिरसोत्पन्नं सुगन्धाढ्यं मनोहरम् ।
धूपं गृहाण देवेश ! प्रसन्नो भव राघव ॥

ॐ रां रामाय नमः अप्रमेयकृपारत्नाकराय भगवते श्रीरामचन्द्राय नमः धूपमाघ्रापयामि ।
हस्तौ प्रक्षाल्य दीपं सन्दर्शयेत् ।

## अथ दीपमन्त्रः

चन्द्रमामनसोजातश्चक्षोःसूर्योऽजायत ।
श्रोत्त्राद्वायुश्चप्राणश्चमुखादग्निरजायत ।
घृतवर्तिसमायुक्तं कर्पूरादिसमन्वितम् ।
दीपं गृहाण देवेश ! मम सिद्धिप्रदो भव ॥

ॐ रां रामाय नमः अप्रमेयकृपारत्नाकराय भगवते श्रीरामचन्द्राय नमः दीपं दर्शयामि ।
हस्तौ प्रक्षाल्य नैवेद्यं निवेदयेत् ।

## अथ नैवेद्यम्

पार्षदान् सन्नह्य भगवतः श्रीरामचन्द्रस्य पुरस्सरं संस्थापित नैवेद्यं तुलसीदल मिश्रितेन तुलस्युदकेन ॐ रां रामाय नमः मन्त्रेण सम्प्रोक्ष्य धेनुमुद्रयाऽमृतीकृत्य तुलसीपत्राणि संस्थाप्य घण्टानादं निनदन् प्रेम्णा निवेदयेत्

## अथ नैवेद्य मन्त्रः

नाभ्याऽसीदन्तरिक्षꣳ शीर्ष्णोद्यौःसमवर्तत ।
पद्‌भ्याम्भूमिर्द्दिशःश्रोत्रात्तथालोकाꣳ॥ आकल्पयन् ।
पूपमोदकसंयावपयः पक्वादिकं वरम ।
निर्मितं बहुसंस्कारैर्नैवेद्यं प्रतिगृह्यताम् ॥

पूर्वापोशनं अमृतोपस्तरणमसि स्वाहा । ग्रासमुद्राः प्रदर्शयेत्ॐ प्राणाय स्वाहा ॐ अपानाय स्वाहा ॐ व्यानाय स्वाहा ॐ उदानाय स्वाहा । ॐ समानाय स्वाहा ॐ ब्रह्मणे नमः ।
भगवते श्रीरामचन्द्राय नमः नैवेद्यं निवेदयामि ॥ धातृफलाकृति ग्रासः । अथ उत्तरापोशनं (आचमनं ) ॐ अमृतापिधानमसि स्वाहा ॥ ततोनैवेद्यं भगवते श्रीरामचन्द्राय शालग्रामाय च निवेद्यान्तः पटं दत्वा बहिरागच्छेत् । वेदं पठन् अथ तारकब्रह्मजपन् मध्ये जलं निवेदयेत् । पुनः नादं निनदन् आचमनीयं जलं समर्प्य करोद्वर्तनं कुर्यात् । ततः छत्रादिचामर व्यजनादीनि समर्प्य दुन्दुभिघण्टाशङ्खादि नादेन नीराजनं कुर्यात् ।

## अथ छत्रमन्त्रः

क्षत्रस्ययोनिरसित्रस्यनाभिरसि ॥

मात्त्वाहिꣳसीन्मामाहिꣳसीः ॥

ॐ रां रामाय नमः अप्रमेयकृपारत्नाकराय भगवते श्रीरामचन्द्राय नमः छत्रं समर्पयामि

## अथ चामरमन्त्रः

आनोनियुद्भिःशतिनीभिरध्वरꣳ सहस्त्रिणीभिरुपयाहियज्ञम् ॥

व्वायोऽस्मिन्त्सवनेमादयस्वयुयम्प्पातस्वस्त्तिभिःसदाः ।
ॐ रां रामाय नमः अप्रमेयकृपारत्नाकराय भगवते श्रीरामचन्द्राय नमः चामरसेवां समर्पयामि

## अथ अश्वमन्त्रः

सुषारथिरश्वानिवयन्मनुष्यान्नेनीयतेभीशुभिर्व्वाजिनऽइव ॥

हृत्प्रतिष्ठन्यदजिरञ्जविष्ठन्तन्न्मेमनःशिवसङ्कल्प्पमस्तु ॥

ॐ रां रामाय नमः अप्रमेयकृपारत्नाकराय भगवते श्रीरामचन्द्राय नमः अश्वं समर्पयामि

## अथ गजमन्त्रः

आतूनऽइन्द्रव्वृत्रहन्नस्म्माकमर्द्धमागहि ॥

महान्न्महीभिरूतिभिः ॥

ॐ रां रामाय नमः अप्रमेयकृपारत्नाकराय भगवते श्रीरामचन्द्राय नमः गजं समर्पयामि

## अथ रथमन्त्रः

रथेतिष्ठन्नयतिव्वाजिनःपुरोयत्रयत्रकामयतेसुषारथिः ॥ अभीशूनाम्महिमानम्पनायतमनःपश्चादनुयच्छन्ति
॥

ॐ रां रामाय नमः अप्रमेयकृपारत्नाकराय भगवते श्रीरामचन्द्राय नमः रथं समर्पयामि

## अथ गीतवाद्य नृत्य विधिः

भगवदुल्लासाय परम्परागानं नृत्यं वाद्यानि च सश्रद्धं समर्पयेत् ॥

पुनः घण्टानादं नादयन् छत्र-चामरव्यजनादिभिरुपचरन् शङ्ख-घण्टा-दुन्दुभिघोषपूर्वकं अलङ्कृतपञ्चवर्त्तिकाभिः नीराजनं कुर्यात् ।
चतुश्चरणौ, द्विर्नाभौ, मुखं सकृत् कृत्वा सप्तभिः सर्वाङ्गं ॐकाराकृत्या परिभ्रामयेत् । तदनन्तरं पश्चिमादिदिशां तत्तद्देवान् तीर्थानि च संस्मृत्य परिक्रमाक्रमेण नीराजयेत् । पुनश्च देहलीस्थ देवान् संस्मृत्य ईषदवनम्य भूमिं च नीराजयेत् ।
पुनः वारत्रयं जलेन धौतवाससा च नीराजनं कुर्यात् । शङ्खोदकं वारत्रयं भ्रामयित्वा गरुडघण्टायां, नीराजनपात्रे ईषन्निक्षिप्य समुपस्थित भक्तजनान् अभिषिञ्चेत् ।

## पुष्पाञ्जलिं विधाय अर्चकः चामरसेवां कुर्यात् ।

# जयघोष

श्रीरामलला सरकार की जय ।
श्रीआनन्दकन्द भगवान् की जय ।
श्रीकौशल्यानन्दन भगवान् की जय ।
श्रीदशरथनन्दन भगवान् की जय ।
श्रीकैकेयीनन्दन भगवान् की जय ।
श्रीसुमित्रानन्दन भगवान् की जय ।
श्री चारों भैयन की जय ।
श्रीहनुमान् जी महाराज की जय ।
श्रीरामजन्मभूमि की जय ।
श्रीकृष्णजन्म भूमि की जय ।
श्रीकाशीविश्वनाथ की जय ।
श्रीअयोध्या धाम की जय ।
श्रीसरयू महारानी की जय ।
जगद्गुरु स्वामी श्रीरामानन्दाचार्य जी महाराज की जय ।
गोस्वामी श्रीतुलसीदास जी महाराज की जय ।
समस्त पूर्वाचार्यों की जय ।
सर्वसन्तवैष्णव भगवान् की जय ।
सत्य सनातन धर्म की जय ।
गो माता की जय ।
भारत माता की जय ।
श्रृङ्गार आरती की जय जय श्री सीताराम

# श्री राम जन्म स्तुति

भए प्रगट कृपाला दीनदयाला कौसल्या हितकारी ।
हरषित महतारी मुनि मन हारी अद्भुत रूप बिचारी ॥

लोचन अभिरामा तनु घनस्यामा निज आयुध भुज चारी ।
भूषन बनमाला नयन बिसाला सोभासिन्धु खरारी ॥

कह दुइ कर जोरी अस्तुति तोरी केहि बिधि करौं अनन्ता ।
माया गुन ग्यानातीत अमाना बेद पुरान भनन्ता ॥

करुना सुख सागर सब गुन आगर जेहिं गावहिं श्रुति सन्ता ।
सो मम हित लागी जन अनुरागी भयौ प्रगट श्रीकन्ता ॥

ब्रह्माण्ड निकाया निर्मित माया रोम रोम प्रति बेद कहै ।
मम उर सो बासी यह उपहासी सुनत धीर मति थिर न रहै ॥

उपजा जब ग्याना प्रभु मुसुकाना चरित बहुत बिधि कीन्ह चहै ।
कहि कथा सुहाई मातु बुझाई जेहि प्रकार सुत प्रेम लहै ॥

माता पुनि बोली सो मति डोली तजहु तात यह रूपा ।
कीजै सिसुलीला अति प्रियसीला यह सुख परम अनूपा ॥

सुनि बचन सुजाना रोदन ठाना होइ बालक सुरभूपा ।
यह चरित जे गावहिं हरिपद पावहिं ते न परहिं भवकूपा ॥

दोहा -
बिप्र धेनु सुर सन्त हित लीन्ह मनुज अवतार ।
निज इच्छा निर्मित तनु माया गुन गो पार ॥

सियावररामचन्द्र जी की जय ।
श्रीअयोध्याराम जी लला जी की जय ।

## श्रीरामचन्द्रस्तुतिः

नमामि भक्तवत्सलं कृपालुशीलकोमलं
भजामि ते पदाम्बुजमकामिनां स्वधामदम् ।
निकाम-श्याम-सुन्दरं भवाम्बुनाथमन्दरं
प्रफुल्लकञ्जलोचनं मदादिदोषमोचनम् ॥ १॥

प्रलम्बबाहुविक्रमं प्रभोऽप्रमेयवैभवं
निषङ्गचापसायकं धरं त्रिलोकनायकम् ।
दिनेशवंशमण्डनं महेशचापखण्डनं
मुनीन्द्रसन्तरञ्जनं सुरारिवृन्दभञ्जनम् ॥ २॥

मनोजवैरिवन्दितमजादिदेवसेवितं
विशुद्धबोधविग्रहं समस्तदूषणापहम् ।
नमामि इन्दिरापतिं सुखाकरं सतां गतिं
भजे सशक्तिसानुजं शचीपतिप्रियानुजम् ॥ ३॥

त्वदङ्घ्रिमूल ये नरा भजन्ति हीनमत्सराः
पतन्ति नो भवार्णव वितर्कवीचिसङ्कुले ।
विविक्तवासिनः सदा भजन्ति मुक्तये मुदा
निरस्य इन्द्रियादिकं प्रयान्ति ते गतिं स्वकम् ॥ ४॥

त्वमेकमद्भुतं प्रभुं निरीहमीश्वरं विभुं
जगद्गुरुं च शाश्वतं तुरीयमेव केवलम् ।
भजामि भाववल्लभं कुयोगिनां सुदुर्लभं
स्वभक्तकल्पपादपं समस्तसेव्यमन्वहम् ॥ ५॥

अनूपरूपभूपतिं नतोऽहमुर्विजापतिं
प्रसीद मे नमामि ते पदाब्जभक्ति देहि मे ।
पठन्ति ये स्तवमिदं नरादरेण ते पदं
व्रजन्ति नाऽत्र संशयस्त्वदीयभक्तिसंयुतम् ॥ ६ ॥

इति श्रीमद्-गोस्वामितुलसीदासकृता रामचन्द्रस्तुतिः सम्पूर्णा ॥

भर्जनं भवबीजानामर्जनं सुखसम्पदाम् ।
तर्जनं यमदूतानां रामरामेति गर्जनम् ॥ (भगवन्नाम गर्जना)
नीराजनानन्तरतत्स्थलं सम्प्रोक्ष्येत् ।

## अथ यन्त्रपूजनम्

यन्त्रस्थदेवान् संस्मृत्य आवरणपूजां कुर्यात्
अथार्घ्यपात्रासादनं
कलशोदकेन चतुरस्त्रं षट्कोणं त्रिकोणं मण्डले कृत्वा शङ्खमुद्रयावष्टभ्य पुष्पाक्षतैराग्नेयनैरृत्यवायव्येशानेषु हृदयशिरः शिखाकवचानि मध्ये नेत्र पूर्वादिदिक्षु चास्त्रं सम्पूजयेत् ।
आग्नेये रां हृदयाय नमः हृदयशक्तिं पूजयामि ।
नैरृत्ये रां शिरसे स्वाहा शिरःशक्तिं पूजयामि ।
वायव्ये मां शिखायै वषट् शिखाशक्तिं पूजयामि ।
ईशाने यं कवचाय हुं कवचशक्तिं पूजयामि ।
मध्ये नं नेत्राभ्यां वौषट् नेत्रशक्तिं पूजयामि ।
पूर्वादिसर्वदिक्षु मः अस्त्राय फट् अस्त्रशक्तिं पूजयामि ।
ॐ अं अग्निमण्डलाय दशकलात्मने श्रीरामार्घ्यपात्राधाराय नमः इत्याधारं प्रतिष्ठाप्य,

तत्र पूर्वादि अष्टदिक्षूपर्यधश्चाग्नेर्दशकलाः पूजयेत् ।
(पूर्व से प्रारम्भ कर आठ दिशाओं में ऊपर और नीचे अग्नि की दश कलाओं का पूजन करना चाहिये ।)
(१) ॐ यं धूम्र्मायै नमः (२) ॐ रं नीलरक्तायै नमः (३) ॐ लं कपिलायै नमः (४) ॐ वं विस्फुलिङ्गन्यै नमः (५) ॐ शं ज्वालायै नमः (७) ॐ षं निष्पत्तिकायै नमः (८) ॐ सं हव्यवाहिन्यै नमः (९) ॐ हं कव्यवाहिन्यै नमः (१०) ॐ लं रौद्रायै नमः (११) क्षं संहारिव्यै नमः

## शङ्खं मन्त्रेण संशोध्य

ॐ सूं सूर्यमण्डलाय द्वादशकलात्मने श्रीरामार्घ्यपात्राय नमः इति शङ्खमाधारे निधाय तत्र सूर्यस्य द्वादशकलाः शङ्खजलात् बहिः शङ्खे सम्पूजयेत् ।
(१) ॐ कं भं तपिन्यै नमः (२) ॐ खं बं तापिन्यै नमः (३) ॐ गं फं सन्धिन्यै नमः (४) ॐ घं पं बोधिन्यै नमः (५) ॐ ङं नं कालिन्यै नमः (६) ॐ चं धं शोषिन्यै नमः (७) ॐ छं दं वरैण्यै नमः (८) जं थं आकर्षिण्यै नमः (९) ॐ झं तं वैष्णव्यै नमः (१०) ञं णं विष्णुविद्यायै नमः (११) ॐ टं ढं ज्योत्स्नायै नमः (१२) ॐ ठं डं हिरण्यायै नमः
ततो मातृकाः प्रतिलोम्येनोच्चरन् शुद्धोदकेन शङ्खं सम्पूज्य ॐ सों सोममण्डलाय षोडशकलात्मने श्रीरामार्घ्यपात्राय नमः इति सम्पूज्य तत्रैव चन्द्रमसः षोडशकलाः पूजयेत् ।
(१) ॐ अं अमृतायै नमः (२) ॐ आं मानदायै नमः (३) ॐ इं तुष्ट्यै नमः (४) ॐ ईं पुष्ट्यै नमः (५) ॐ उं प्रीत्यै नमः (६) ॐ ऊं रत्यै नमः (७) ॐ ॠं लज्जायै नमः (८) ॐ ॠॠं श्रियै नमः (९) ॐ ॡं स्वधायै नमः (१०) ॐ ॡं रात्र्यै नमः (११) ॐ एं ज्योत्स्नायै नमः (१२) ॐ ऐं हंसशक्त्यै नमः (१३) ॐ ॐ छायायै नमः (१४) ॐ औं पूरिण्यै नमः (१५) ॐ अं वामायै नमः (१६) ॐ अः आमायै नमः ।

## शङ्खजलपूजनं

अङ्कुशमुद्रया सर्वाणि तीर्थान्यावाह्य धेनुमुद्रया अमृतीकृत्य शङ्खचक्रगरुडमुद्रां प्रदर्श्य परमीकरणमुद्रया परमीकृतं कुर्यात् (अङ्कुशमुद्रापूर्वक तीर्थों का आवाहन करें, धेनुमुद्रा प्रदर्शित कर शङ्ख चक्र गरुडमुद्रा प्रदर्शित करेम् । परमीकरण मुद्रा से परमीकृत करेम् ।)
गङ्गे च यमुने चैव गोदावरी सरस्वति ।
नर्मदे सिन्धु कावेरी जलेऽस्मिन् सन्निधिं कुरु ॥

इति तीर्थान्यावाह्य गन्धाद्यैरर्चयेत्
शङ्खे पाणितले दत्वा जपेन्मन्त्रं षडक्षरम् ।
चिन्मयं चिन्तयेत्तीर्थमानीयाच्छङ्खमुद्रया ॥

पाञ्चजन्याय विद्महे पावमानाय धीमहि तन्नः शङ्खः प्रचोदयात्
अपने सम्मुख अभिषेकपात्र में वामभाग में (१) श्रीगुरुभ्यो नमः (२) श्रीपरमगुरुभ्यो नमः (३) श्रीपरमेष्ठिगुरुभ्यो नमः (४) श्रीपरात्परगुरुभ्यो नमः इस प्रकार गुरु की अर्चा कर के स्वदक्षिण भाग में (१) गं गणपतये नमः (२) सं सरस्वत्यै नमः (३) दुं दुर्गायै नमः (४) क्षं क्षेत्रपालाय नमः (५) ह्रीं बटुकाय नमः इन मन्त्रों से गणपति आदि देवताओं की पूजा करनी चाहिये । मध्य में वास्तुपुरुषाय नमः से पूजन कर पीठ के मध्य में मण्डूकाय नमः से पूजन करना चाहिये । पीठ के ऊपर (१) कालाग्निरुद्राय नमः (२) कूर्माय नमः (३) आधारशक्तये नमः (४) पृथिव्यै नमः इन आधार शक्तियों का पूजन कर (१) क्षीरसमुद्राय नमः (२) रत्नद्वीपाय नमः (३) मणिमण्डपाय नमः (४) कल्पवृक्षेभ्यो नमः (५) रत्नवेदिकायै नमः (६) रत्नसिंहासनाय नमः इन मन्त्रों से भगवान् के निवासस्थल की पूजा पीठ में ही करनी चाहिये । पीठ के आग्नेयादि चार पादों में (१) धर्माय नमः (२) ज्ञानाय नमः (३) वैराग्याय नमः (४) ऐश्वर्याय नमः इस मन्त्र से पूजन करके पीठगात्र में पूर्वादि क्रम से (१) अधर्माय नमः (२) अज्ञानाय नमः (३) अवैराग्याय नमः (४) अनैश्वर्याय नमः इस मन्त्र से पूजा करनी चाहिये । कर्णिका में आनन्दकन्द, नाल, सरोरुह, पत्र और केसर की पूजा करनी चाहिये (१) आनन्दकन्दाय नमः, (२) संविन्नालाय नमः, (३) चित्सरोरुहाय नमः, (४) ज्ञानमयपत्रेभ्यो नमः (५) केशरेभ्यो नमः कर्णिका में प्रणव, अर्कबीज, चन्द्रबीज और अभिवीजपूर्वक अर्कमण्डल, अग्निमण्डल तथा इन्दुमण्डल इन तीनों मण्डलों, सत्व, रज तथा तम इन तीनों गुणों, आत्मा, अन्तरात्मा, परमात्मा और ज्ञानात्मा इन आत्मचतुष्टयों, मायातत्त्व, कलातत्त्व, विद्यातत्त्व तथा परतत्त्व इन तत्त्वत्चतुष्टयों का एक-एक के ऊपर पूजन करके (१) विमला, (२) उत्कर्षणी, (३) ज्ञाना, (५) क्रिया, (५) योगा (६) प्रह्वी, (७) सत्या, (८) ईशाना तथा (९) अनुग्रहा । इन शक्तियों का यजन पूर्वादि अष्ट पत्रों और कर्णिका में करना चाहिये ।
१. ॐ अं अर्कमण्डलाय नमः (२) ॐ रं अग्निमण्डलाय नमः (३) ॐ इं इन्दुमण्डलाय नमः, (१) सं सत्वाय नमः (२) ॐ रं रजसे नमः (३) ॐ तं तमसे नमः, (१) ॐ आत्मने नमः (२) अन्तरात्मने नमः (३) ॐ ज्ञानात्मने नमः (४) ॐ परमात्मने नमः (१) ॐ मायातत्त्वाय नमः (२) कलातत्त्वाय नमः (३) ॐ विद्यातत्त्वाय नमः (४) ॐ परतत्त्वाय नमः (१) ॐ विमलायै नमः (२) ॐ उत्कर्षिण्यै नमः (२) ॐ ज्ञानायै नमः (४) ॐ क्रियायै नमः (५) ॐ योगायै नमः (६) ॐ प्रह्व्यै नमः (७) ॐ सत्यायै नमः (८) ॐ ईशानायै नमः । मध्ये (९) ॐ अनुग्रहायै नमः ।
परात्पर श्रीरामचन्द्रजी का ध्यान यन्त्र को स्थापित करके मध्य में शालिग्राम भगवान् को प्रतिष्ठित कर हाथ मे पुष्प लेकर हृदय कमल में स्थित चैतन्य श्री विग्रह राम जी का ध्यान कर पादुका मुद्रा से श्वास द्वारा पुष्पाञ्जलि में समागत श्रीराम जी की भावना कर सम्पुट मुद्रा से मूर्ति में सयोजित करके भगवान का ध्यान करे -
काञ्चनप्रख्यया देव्या वामभागस्थयान्वितम् ।

लक्ष्मणेन धृतच्छत्रं सुवर्णाभेन धीमता ॥

अनेकैः सेवितं दिव्यं परिवारैरनेकशः ।
मानसैरुपचारैस्तु सम्यक् सम्पूज्य यत्नतः ॥

सूर्यमण्डलमध्यस्थं रामं सीतासमन्वितम् ।
नमामि पुण्डरीकाक्षमाञ्जनेयगुरुं परम् ॥

नमः श्रीरामदेवाय ज्योतिषां पतये नमः ।
साक्षिणे सर्वभूतानां परमानन्दरूपिणे ॥

रघुनाथाय दिव्याय महाकारुणिकाय च ।
नमोऽस्तु कौशिकानन्द दायिने ब्रह्मरूपिणे ॥

दीपस्थानञ्च कर्त्तव्यं रामं ध्यायेदनन्यधीः ।
त्रिकालमेवं यः कुर्याद् राम एव भवेत् स्वयम् ॥

पुरश्चर्या तु सर्वेषामुक्तमार्गेण वेष्यते ।
लक्ष्मणं पश्चिमेभागे धृतच्छत्रसचामरम् ।
पार्श्वे भरतशत्रुघ्नौ तालवृन्तधरावुभौ ॥

आवाहनादि मुद्राओं का प्रदर्शन करें
कुसुमाञ्जलि, आवाहनी, सन्निधीकरण , सन्निरोधनी, समुखीकरणी , सकलीकरण , परमीकरण, अवगुष्ठन, धेनु, शङ्ख, गदा, पद्म, कौस्तुभ, श्री चक्र मुद्राओं से भगवान् को प्रतिष्ठित करें
यथापूर्वं आवाहनादि पूजनं कृत्वा पुष्पमालातुलसीदलञ्च-
तुलसीकुन्दमन्दारजातीपुन्नागचम्पकैः ।
कदम्बकरवीरैश्च कुसुमैः शतपत्रकैः ॥

नीलाम्बुजैर्बिल्वदलैः पुष्पमाल्यैश्च राघव ।
पूजयिष्याम्यहं भक्त्या सङ्गृहाण जनार्दन ॥

अनेन मन्त्रेण तुलसीकुन्दमन्दारजाती(चमेली) पुन्नागकमलबिल्वपत्रपुष्पादयः समर्पयेत् ।
अथैष्टदेवस्य अनुज्ञया आवरणपूजां कुर्यात् ॥

हस्ते पुष्पाणि गृहीत्वा
तदुपरान्त त्रिकोणमध्ये
ॐ श्री सीतायै स्वाहा । सीताचरणपादुकां पूजयामि तर्पयामि नमः । ॐ रां रामाय नमः । श्री रामचरणपादुकां पूजयामि तर्पयामि नमः । ॐ लं लक्ष्मणाय नमः । लक्ष्मणचरणपादुकां

पूजयामि तर्पयामि नमः । ॐ शं शाङ्गाय नमः । शाङ्गचरणपादुकां पूजयामि तर्पयामि नमः ।
ॐ शं शराय नमः । शरचरणपादुकां पूजयामि तर्पयामि नमः ।
वरदाभय धारिण्यौ वह्न्याशामारभ्य पूजयेत् ।
हरिन्दुश्यामनीलाभाः कृष्णारुणरुधः स्त्रियः ।
हस्तौ प्रक्षाल्य

## अथ प्रथमावरणः- षट्कोणे आग्नेयादारभ्य

(१) ॐ रां हृदयाय नमः हृदयशक्तिं श्रीपादुकां पूजयामि तर्पयामि नमः ।
(२) ॐ रीं शिरसे स्वाहा शिरः शक्तिं श्रीपादुकां पूजयामि तर्पयामि नमः ।
(३) ॐ रूं शिखायै वषट् शिखाशक्तिं श्रीपादुकां पूजयामि तर्पयामि नमः
(४) ॐ रैं कवचाय हुं कवचशक्तिं श्रीपादुकां पूजयामि तर्पयामि नमः ।
(५) ॐ रौं नेत्रत्रयाय वौषट् नेत्रत्रयशक्तिं श्रीपादुकां पूजयामि तर्पयामि नमः ।
(६) रः अस्त्राय फट् अस्त्रशक्तिं श्रीपादुकां पूजयामि तर्पयामि नमः । इति प्रथमावरणाम् ।
एताः श्रीरामचन्द्रस्यचक्रे प्रथमावरणास्थ देवताः साङ्गाः सायुधाः सशक्तिकाः सवाहनाः सर्वोपचारैः सम्पूजिताः सन्तर्पिताः सन्तुष्टाः सन्तु नमः । शङ्खमुद्रां प्रदर्शय ।
अभीष्ट सिद्धिं मे देहि शरणागतवत्सल । भक्त्या समर्पयेत्तुभ्यं प्रथमावरणार्चनम् ॥

प्रथमावरणे षडङ्गपरिवारित श्रीरामचन्द्राय नमः (योनिमुद्रया प्रणमेत्)
सब शक्तियाँ हाथ में वर और अभय धारण की हुई हैम् ।
वरदाभयधारिण्यो वह्न्याशामारभ्य पूजयेत् । हारेन्दुश्यामनीलाभाः कृष्णारुणरुचः स्त्रियः ॥

हस्तौ प्रक्षाल्य

## अथ द्वितीयावरणः-अष्टदले मूले आग्नेयादारभ्य

ॐ अं आत्मने नमः आत्मश्रीपादुकां पूजयामि तर्पयामि नमः
ॐ निं निवृत्यै नमः निवृत्तिश्रीपादुकां पूजयामि तर्पयामि नमः
ॐ अं अन्तरात्मने नमः अन्तरात्मश्रीपादुकां पूजयामि तर्पयामि नमः
ॐ प्रं प्रतिष्ठायै नमः प्रतिष्ठाश्रीपादुकां पूजयामि तर्पयामि नमः
ॐ पं परमात्मने नमः परमात्मश्रीपादुकां पूजयामि तर्पयामि नमः
ॐ विं विद्यायै नमः विद्याश्रीपादुकां पूजयामि तर्पयामि नमः
ॐ सं ज्ञानायै नमः ज्ञानश्रीपादुकां पूजयामि तर्पयामि नमः
ॐ शां शान्त्यै नमः शान्तिश्रीपादुकां पूजयामि तर्पयामि नमः

एताः श्रीरामचन्द्रस्य चक्रे द्वितीयावरणास्थ देवताः साङ्गाः सायुधाः सशक्तिकाः सवाहनाः सर्वोपचारैः सम्पूजिताः सन्तर्पिताः सन्तुष्टाः सन्तु नमः । चक्रमुद्रां प्रदर्शय ।
अभीष्ट सिद्धिं मे देहि शरणागतवत्सल ।
भक्त्या समर्पयेत्तुभ्यं द्वितीयावरणार्चनम् ॥

शक्तिचतुष्टय परिवारित श्रीरामचन्द्राय नमः (योनिमुद्रया प्रणमेत्)
द्वितीयात्मादिकैर्देवैरष्टाब्जमूलके तथा ।
यथा रामस्तथैवेताशक्तयश्च कराम्बुजाः ॥

इति द्वितीयावरणम् ।
हस्तौप्रक्षाल्य

## अथ तृतीयावरणः- अष्टासु पत्रेषु आग्नेयादारभ्य

(१) ॐ वां वासुदेवाय नमः वासुदेवश्रीपादुकां पूजयामि तर्पयामि नमः ।
(२) ॐ श्रीं श्रियै नमः श्रियश्रीपादुकां पूजयामि तर्पयामि नमः ।
(३) ॐ सं सङ्कर्षणाय नमः सङ्कर्षणश्रीपादुकां पूजयामि तर्पयामि नमः ।
(४) ॐ सं सरस्वत्यै नमः सरस्वतीश्रीपादुकां पूजयामि तर्पयामि नमः ।
(५) ॐ प्रं प्रद्युम्नाय नमः प्रद्युम्नश्रीपादुकां पूजयामि तर्पयामि नमः ।
(६) ॐ रं रत्यै नमः रतिश्रीपादुकां पूजयामि तर्पयामि नमः ।
(७) ॐ अं अनिरुद्धाय नमः अनिरुद्धश्रीपादुकां पूजयामि तर्पयामि नमः ।
(८) ॐ प्रीं प्रीत्यै नमः प्रीतिश्रीपादुकां पूजयामि तर्पयामि नमः ।
ॐ एताः रामचन्द्रस्यचक्रे तृतीयावरणस्थ देवताः साङ्गाः सायुधाः सशक्तिकाः सवाहनाः सर्वोपचारैः सन्तर्पिताः सन्तुष्टाः सन्तु नमः । गदामुद्रां प्रदर्शय ।
अभीष्ट सिद्धिं मे देहि शरणागतवस्तल ।
भक्त्या समर्पयेत्तुभ्यं तृतीयावरणार्चनम् ॥

तृतीयावरणे सशक्तिकवासुदेवादिपरिवारित श्रीरामचन्द्राय नमः (योनिमुद्रया प्रणमेत्)
तत्र स्फटिकस्वर्णदूर्वेन्द्रनीलाभादेवाः । स्वच्छाच्छपद्मकिञ्जल्कश्यामलाः शक्तयः ।
इति तृतीयावरणम् ।
हस्तौ प्रक्षाल्य

## अथ चतुर्थावरणः- अष्टपत्राग्रेषु भगवतःपुरतः परिक्रमाक्रमेण

(१) ॐ हं हनुमते नमः हनुमच्छ्रीपादुकां पूजयामि तर्पयामि नमः ।

(२) ॐ सुं सुग्रीवाय नमः सुग्रीवश्रीपादुकां पूजयामि तर्पयामि नमः ।
(३) ॐ भं भरताय नमः भरतश्रीपादुकां पूजयामि तर्पयामि नमः ।
(४) ॐ विं विभीषणाय नमः विभीषणश्रीपादुकां पूजयामि तर्पयामि नमः ।
(५) ॐ लं लक्ष्मणाय नमः लक्ष्मणश्रीपादुकां पूजयामि तर्पयामि नमः ।
(६) ॐ अं अङ्गदाय नमः अङ्गदश्रीपादुकां पूजयामि तर्पयामि नमः ।
(७) ॐ शं शत्रुघ्नाय नमः शत्रुघ्नश्रीपादुकां पूजयामि तर्पयामि नमः ।
(८) ॐ जां जाम्बवते नमः जाम्बवच्छ्रीपादुकां पूजयामि तर्पयामि नमः ।
ॐ एताः रामचन्द्रस्यचक्रे चतुर्थावरणस्थ देवताः साङ्गाः सायुधाः सशक्तिकाः सवाहनाः सर्वोपचारैः सन्तर्पिताः सन्तुष्टाः सन्तु नमः । पद्ममुद्रां प्रदर्शय ।
अभीष्ट सिद्धिं मे देहि शरणागतवस्तल ।
भक्त्या समर्पयेत्तुभ्यं चतुर्थावरणार्चनम् ॥

चतुर्थावरणे हनुमतादिवानर भरतादि भ्रातृपरिवारित श्रीरामचन्द्राय नमः (योनिमुद्रया प्रणमेत्)
वाचयन्तं हनूमन्तं देवस्याग्रे सपुस्तकम् ।
रम्यौ भरतशत्रुघ्नौ धृतातपत्रं सौमित्रम् ।
कृताञ्जलिपुटान् परान् । अत्र सौमित्रिः सहस्रफणातपत्रधरः ॥

हस्तौ प्रक्षाल्य

## अथ पञ्चमावरणः-द्वितीयेऽष्टदले ईशानादारभ्य

(१) ॐ सुं सृष्ट्यै नमः सृष्टिश्रीपादुकां पूजयामि तर्पयामि नमः । (पाठान्तर - धृं धृष्ट्यैनमः)
(२) ॐ जं जयन्ताय नमः जयन्तश्रीपादुकां पूजयामि तर्पयामि नमः ।
(३) ॐ विं विजयाय नमः विजयश्रीपादुकां पूजयामि तर्पयामि नमः ।
(४) ॐ सौं सौराष्ट्राय नमः सुराष्ट्रश्रीपादुकां पूजयामि तर्पयामि नमः ।
(५) ॐ रां राष्ट्रवर्धनाय नमः राष्ट्रवर्धनश्रीपादुकां पूजयामि तर्पयामि नमः ।
(६) ॐ अं अकोपनाय नमः अकोपनश्रीपादुकां पूजयामि तर्पयामि नमः ।
(७) ॐ धं धर्मपालाय नमः धर्मपालश्रीपादुकां पूजयामि तर्पयामि नमः ।
(८) ॐ सुं सुमन्त्राय नमः सुमन्त्रश्रीपादुकां पूजयामि तर्पयामि नमः ।
एताः श्रीरामचन्द्रस्यचक्रे पञ्चमावरणस्थ देवताः साङ्गाः सायुधाः सशक्तिकाः सवाहनाः सर्वोपचारैःसम्पूजिताः सन्तर्पिताः सन्तुष्टाः सन्तु नमः । धेनुमुद्रां प्रदर्शय
अभीष्ट सिद्धिं मे देहि शरणागतवस्तल ।
भक्त्या समर्पयेत्तुभ्यं पञ्चमावरणार्चनम् ॥

पञ्चमावरणे धृष्ट्यादिवरिवृत श्रीरामचन्द्राय नमः (योनिमुद्रया प्रणमेत्)
एतान् मन्त्रिणः कृताञ्जलीन् आन्वीक्षिकीं मन्त्रयतो द्वितीयाष्टदलेऽर्चयेत् ॥

हस्तौ प्रक्षाल्य

## अथ षष्ठावरणः- द्वादशपत्रेषु आग्नेयादारभ्य

(१) ॐ वं वसिष्ठाय नमः वसिष्ठश्रीपादुकां पूजयामि तर्पयामि नमः ।
(२) ॐ वां वामदेवाय नमः वामदेवश्रीपादुकां पूजयामि तर्पयामि नमः ।
(३) ॐ जां जाबालये नमः जाबालिश्रीपादुकां पूजयामि तर्पयामि नमः ।
(४) ॐ गौं गौतमाय नमः गौतमश्रीपादुकां पूजयामि तर्पयामि नमः ।
(५) ॐ भं भरद्वाजाय नमः भरद्वाजश्रीपादुकां पूजयामि तर्पयामि नमः ।
(६) ॐ कौं कौशिकाय नमः कौशिकश्रीपादुकां पूजयामि तर्पयामि नमः ।
(७) ॐ वां वाल्मीकये नमः वाल्मीकिश्रीपादुकां पूजयामि तर्पयामि नमः ।
(८) ॐ नां नारदाय नमः नारदश्रीपादुकां पूजयामि तर्पयामि नमः ।
(९) ॐ सं सनकाय नमः सनकश्रीपादुकां पूजयामि तर्पयामि नमः ।
(१०) ॐ सं सनन्दनाय नमः सनन्दनश्रीपादुका पूजयामि तर्पयामि नमः ।
(११) ॐ सं सनातनाय नमः सनातनश्रीपादुकां पूजयामि तर्पयामि नमः ।
(१२) ॐ सं सनत्कुमाराय नमः सनत्कुमारश्रीपादुकां पूजयामि तर्पयामि नमः ।
एताः श्रीरामचन्द्रस्यचक्रे षष्ठावरणस्थ देवताः साङ्गाः सायुधाः सशक्तिकाः सवाहनाः सर्वोपचारैः सम्पूजिताः सन्तर्पिताः सन्तुष्टाः सन्तु नमः । गरुड मुद्रां प्रदर्शय ।
अभीष्ट सिद्धिं मे देहि शरणागतवस्तल । भक्त्या समर्पयेत्तुभ्यं षष्ठमावरणार्चनम् ॥

षष्ठावरणे ऋषिगणावृत श्रीरामचन्द्राय नमः (योनिमुद्रया प्रणमेत्)
कमण्डलुधरान् सर्वान् मन्त्रमुच्चरतो मुनीन् ।
द्वादशारेऽर्चयेत् पूर्वादिक्रमेण ततः परान् ॥

हस्तौ प्रक्षाल्य

## अथ सप्तमावरणः- षोडशदले आग्नेयादारभ्य

(१) ॐ नीं नीलाय नमः नीलश्रीपादुकां पूजयामि तर्पयामि नमः ।
(२) ॐ नं नलाय नमः नलश्रीपादुकां पूजयामि तर्पयामि नमः ।
(३) ॐ सुं सुषेणाय नमः सुषेणश्रीपादुकां पूजयामि तर्पयामि नमः ।
(४) ॐ मैं मैन्दाय नमः मैन्दश्रीपादुकां पूजयामि तर्पयामि नमः ।

(५) ॐ शं शरभाय नमः शरभश्रीपादुकां पूजयामि तर्पयामि नमः ।
(६) ॐ द्विं द्विविदाय नमः द्विविदश्रीपादुकां पूजयामि तर्पयामि नमः ।
(७) ॐ चं चन्दनाय नमः चन्दनश्रीपादुकां पूजयामि तर्पयामि नमः ।
(८) ॐ गं गवाक्षाय नमः गवाक्षश्रीपादुकां पूजयामि तर्पयामि नमः ।
(९) ॐ किं किरीटाय नमः किरीटश्रीपादुकां पूजयामि तर्पयामि नमः ।
(१०) ॐ कुं कुण्डलाभ्यां नमः कुण्डलश्रीपादुकां पूजयामि तर्पयामि नमः ।
(११) ॐ श्रीं श्रीवत्साय नमः श्रीवत्सश्रीपादुकां पूजयामि तर्पयामि नमः ।
(१२) ॐ कौं कौस्तुभाय नमः कौस्तुभश्रीपादुकां पूजयामि तर्पयामि नमः ।
(१३) ॐ शं शङ्खाय नमः शङ्खश्रीपादुकां पूजयामि तर्पयामि नमः ।
(१४) ॐ चं चक्राय नमः चक्रश्रीपादुकां पूजयामि तर्पयामि नमः ।
(१५) ॐ गं गदायै नमः गदाश्रीपादुकां पूजयामि तर्पयामि नमः ।
(१६) ॐ पं पद्माय नमः पद्मश्रीपादुकां पूजयामि तर्पयामि नमः ।
षौडशदलाब्जे पूर्वादिक्रमेणार्चयेत् कृताञ्जलीन् ।
एताः श्रीरामचन्द्रस्यचक्रे सप्तमावरणास्थ देवताः साङ्गाः सायुधाः सशक्तिकाः सवाहनाः सर्वोपचारैः सम्पूजिताः सन्तर्पिताः सन्तुष्टाः सन्तु नमः । गरुड मुद्रां प्रदर्शयेत् ।
अभीष्ट सिद्धिं मे देहि शरणागतवस्तल ।
भक्त्या समर्पयेत्तुभ्यं सप्तमावरणार्चनम् ॥

सप्तमावरणे नलादिपरिवृत श्रीरामचन्द्राय नमः (योनिमुद्रया प्रणमेत्)
हस्तौ प्रक्षाल्य

## अथ अष्टमावरणः- द्वात्रिंशद्दलेषु पुरतः

(१) ॐ ध्रुं ध्रुवाय नमः ध्रुवश्रीपादुकां पूजयामि तर्पयामि नमः ।
(२) ॐ धं धराय नमः धरश्रीपादुकां पूजयामि तर्पयामि नमः ।
(३) ॐ सों सोमाय नमः सोमश्रीपादुकां पूजयामि तर्पयामि नमः ।
(४) ॐ अं अपाय नमः अपश्रीपादुकां पूजयामि तर्पयामि नमः ।
(५) ॐ अं अनिलाय नमः अनिलश्रीपादुकां पूजयामि तर्पयामि नमः ।
(६) ॐ अं अनलाय नमः अनलश्रीपादुकां पूजयामि तर्पयामि नमः ।
(७) ॐ प्रं प्रत्यूषाय नमः प्रत्यूषश्रीपादुकां पूजयामि तर्पयामि नमः ।
(८) ॐ प्रं प्रभासाय नमः प्रभासश्रीपादुकां पूजयामि तर्पयामि नमः ।
(९) ॐ हं हराय नमः हरश्रीपादुकां पूजयामि तर्पयामि नमः ।
(१०) ॐ बं बहुरुपाय नमः बहुरुपश्रीपादुकां पूजयामि तर्पयामि नमः ।

(११) ॐ त्र्यं त्र्यम्बकाय नमः त्र्यम्बकश्रीपादुकां पूजयामि तर्पयामि नमः ।
(१२) ॐ अं अपरिजाताय नमः अपरिजातश्रीपादुकां पूजयामि तर्पयामि नमः ।
(१३) ॐ शं शम्भवे नमः शम्भुश्रीपादुकां पूजयामि तर्पयामि नमः ।
(१४) ॐ वृं वृषाकपये नमः वृषाकपिन्श्रीपादुकां पूजयामि तर्पयामि नमः ।
(१५) ॐ कं कपर्दिने नमः कपर्दिन्श्रीपादुकां पूजयामि तर्पयामि नमः ।
(१६) ॐ रें रेवतायै नमः रेवताश्रीपादुकां पूजयामि तर्पयामि नमः ।
(१७) ॐ मृं मृगव्याधोये नमः म्रिग्व्यधीन श्रीपादुकां पूजयामि तर्पयामि नमः ।
(१८) ॐ शं शर्वाय नमः शर्वश्रीपादुकां पूजयामि तर्पयामि नमः ।
(१९) ॐ कं कपालिने नमः कपालिन्श्रीपादुकां पूजयामि तर्पयामि नमः ।
(२०) ॐ धां धात्रे नमः धातृश्रीपादुकां पूजयामि तर्पयामि नमः ।
(२१) ॐ अं अर्यम्णे नमः अर्यमाणश्रीपादुकां पूजयामि तर्पयामि नमः ।
(२२) ॐ मिं मित्रायनमः मित्रश्रीपादुकां पूजयामि तर्पयामि नमः ।
(२३) ॐ वं वरुणाय नमः वरुणश्रीपादुकां पूजयामि तर्पयामि नमः ।
(२४) ॐ अं अंशाय नमः अंशश्रीपादुकां पूजयामि तर्पयामि नमः ।
(२५) ॐ भं भगाय नमः भगश्रीपादुकां पूजयामि तर्पयामि नमः ।
(२६) ॐ इं इन्द्राय नमः इन्द्रश्रीपादुकां पूजयामि तर्पयामि नमः ।
(२७) ॐ विं विवस्वते नमः विवस्वतश्रीपादुकां पूजयामि तर्पयामि नमः ।
(२८) ॐ पुं पूष्णे नमः पूषन्श्रीपादुकां पूजयामि तर्पयामि नमः ।
(२९) ॐ पं पारिजाताय नमः पारिजातश्रीपादुकां पूजयामि तर्पयामि नमः ।
(३०) ॐ त्वं त्वष्ट्रे नमः त्वष्टृश्रीपादुकां पूजयामि तर्पयामि नमः ।
(३१) ॐ विं विष्णवे नमः विष्णुश्रीपादुकां पूजयामि तर्पयामि नमः ।
(३२) ॐ वं वषड्काराय नमः वषड्कारश्रीपादुकां पूजयामि तर्पयामि नमः ।

इत्यष्टमावरणं

एताः श्रीरामचन्द्रस्यचक्रे अष्टमावरणस्थ देवताः साङ्गाः सायुधाः सशक्तिकाः सवाहनाः सर्वोपचारैः सम्पूजिताः सन्तर्पिताः सन्तुष्टाः सन्तु नमः । श्रीवत्स मुद्रां प्रदर्शय ।

अभीष्ट सिद्धिं मे देहि शरणागतवस्तल ।
भक्त्या समर्पयेत्तुभ्यं अष्टमावरणार्चनम् ॥

अष्टमावरणे ध्रुवादिपरिवृत श्रीरामचन्द्राय नमः (योनिमुद्रया प्रणमेत्)
हस्तौ प्रक्षाल्य

## अथ नवमावरणः-द्वात्रिंशद्दलबाह्ये प्रथमभूपुराद् बहिः-

१. ॐ लं इन्द्राय सुराधिपतये सायुधाय सपरिवाराय वाहनाय स्वशक्तियुताय नमः इन्द्रश्रीपादुकां पूजयामि तर्पयामि नमः ।
२. ॐ रं अग्नये तेजोधिपतये सायुधाय सपरिवाराय वाहनाय स्वशक्तियुताय नमःअग्निश्रीपादुकां पूजयामि तर्पयामि नमः ।
३. ॐ यं यमाय प्रेताधिपतये सायुधाय सपरिवाराय वाहनाय स्वशक्तियुताय नमः यमश्रीपादुकां पूजयामि तर्पयामि नमः ।
४. ॐ क्षं निरृतये रक्षोऽधिपतये सायुधाय सपरिवाराय वाहनाय स्वशक्तियुताय नमः निरृतिश्रीपादुकां पूजयामि तर्पयामि नमः ।
५. ॐ वं वरुणाय जलाधिपतये सायुधाय सपरिवाराय वाहनाय स्वशक्तियुताय नमः वरुणश्रीपादुकां पूजयामि तर्पयामि नमः ।
६. ॐ यं वायवे प्राणाधिपतये सायुधाय सपरिवाराय वाहनाय स्वशक्तियुताय नमः वायुश्रीपादुकां पूजयामि तर्पयामि नमः ।
७. ॐ सं सोमाय नक्षत्राधिपतये सायुधाय सपरिवाराय वाहनाय स्वशक्तियुताय नमः सोमश्रीपादुकां पूजयामि तर्पयामि नमः ।
८. ॐ ईं ईशानाय विद्याधिपतये सायुधाय सपरिवाराय वाहनाय स्वशक्तियुताय नमः ईशानश्रीपादुकां पूजयामि तर्पयामि नमः ।
इति पूर्वाद्यष्टदिक्षु ।
९. ॐ आं ब्रह्मणे ईं ईशानाय लोकाधिपतये सायुधाय सपरिवाराय वाहनाय स्वशक्तियुताय नमः ब्रह्मरूद्रश्रीपादुके पूजयामि तर्पयामि नमः । इति ईशानपूर्वयोर्मध्ये ।
१०. ॐ ह्रीं विष्णवे भूताधिपतये सायुधाय सपरिवाराय वाहनाय स्वशक्तियुताय नमः विष्णुश्रीपादुकां पूजयामि तर्पयामि नमः । नैरृत्यपश्चिममध्ये ।
एताः श्रीरामचन्द्रस्यचक्रे नवमावरणस्थ देवताः साङ्गाः सायुधाः सशक्तिकाः सवाहनाः सर्वोपचारैः सम्पूजिताः सन्तर्पिताः सन्तुष्टाः सन्तु नमः । वनमाला मुद्रां प्रदर्शय ।
अभीष्ट सिद्धिं मे देहि शरणागतवस्तल ।
भक्त्या समर्पयेत्तुभ्यं नवमावरणार्चनम् ॥

नवमावरणे दिक्पालपरिवृत श्रीरामचन्द्राय नमः (योनिमुद्रया प्रणमेत्)
इतिनवमावरणं
हस्तौ प्रक्षाल्य

# अथ दशमावरणः-नवमावरणार्चनक्रमेण द्वितीयभूपुरे-

(१) ॐ वं वज्राय नमः वज्रश्रीपादुकां पूजयामि तर्पयामि नमः ।
(२) ॐ शं शक्त्यै नमः शक्तिश्रीपादुकां पूजयामि तर्पयामि नमः ।
(३) ॐ दं दण्डाय नमः दण्डश्रीपादुकां पूजयामि तर्पयामि नमः ।
(४) ॐ खं खड्गाय नमः खड्गश्रीपादुकां पूजयामि तर्पयामि नमः ।
(५) ॐ पां पाशाय नमः पाशश्रीपादुकां पूजयामि तर्पयामि नमः ।
(६) ॐ ध्वं ध्वजाय नमः ध्वजश्रीपादुकां पूजयामि तर्पयामि नमः ।
(७) ॐ गं गदायै नमः गदाश्रीपादुकां पूजयामि तर्पयामि नमः ।
(८) ॐ त्रिं त्रिशूलाय नमः त्रिशूलश्रीपादुकां पूजयामि तर्पयामि नमः ।
(९) ॐ अं अम्बुजाय नमः अम्बुजश्रीपादुकां पूजयामि तर्पयामि नमः ।
(१०) ॐ चं चक्राय नमः चक्रश्रीपादुकां पूजयामि तर्पयामि नमः ।
एताः श्रीरामचन्द्रस्यचक्रे दशमावरणस्थ देवताः साङ्गाः सायुधाः सशक्तिकाः सवाहनाः सर्वोपचारैः सन्तर्पिताः सन्तुष्टाः सन्तु नमः । योनि मुद्रां प्रदर्शय ।
अभीष्ट सिद्धिं मे देहि शरणागतवस्तल । भक्त्या समर्पयेत्तुभ्यं दशमावरणार्चनम् ॥

दशमावरणे दिक्पालायुधपरिवृत श्रीरामचन्द्राय नमः (योनिमुद्रया प्रणमेत्)
ॐ तृतीयभूगृह देवताभ्यो नमः
ॐ श्रीरामपार्षदेभ्यो नमः ॐ श्रीरामपार्षदेभ्यो नमः ॐ श्रीरामपार्षदेभ्यो नमः ॐ श्रीरामपार्षदेभ्यो नमः ॐ श्रीरामपार्षदेभ्यो नमः ॐ श्रीरामपार्षदेभ्यो नमः ॐ श्रीरामपार्षदेभ्यो नमः ॐ श्रीरामपार्षदेभ्यो नमः
ॐ में मेषाय नमः , ॐ वृं वृषभाय नमः, ॐ मिं मिथुनाय नमः, ॐ कङ्कर्काय नमः, ॐ सिं सिंहाय नमः, ॐ कं कन्यायै नमः, ॐ तुं तुलायै नमः, ॐ वृं वृश्चिकाय नमः, ॐ धं धनवे नमः , ॐ मं मकराय नमः, ॐ कुं कुम्भाय नमः, ॐ मीं मीनाय नमः द्वादशराशीभ्यो नमः
ॐ अं अनन्ताय नमः, ॐ वं वासुकये नमः, ॐ तं तक्षकाय नमः, ॐकं कर्कोटकाय नमः, ॐ पं पद्माय नमः, ॐ मं महापद्माय नमः , ॐ शं शङ्खाय नमः, ॐ कुं कुलिकाय नमः श्रीबहिर्नागेभ्यो नमः श्रीपादुकां पूजयामि नमः ।
ॐ प्रणवस्वरुपाय चिच्छक्तिरुपसीतासमङ्कतोत्सङ्गाय अहङ्काररुपकोदण्डधारिणि बोद्धितत्वरुपशरपाणये सच्चिदानन्दात्म्क चिन्मुद्राङ्किताय साङ्गाय सायुधाय सवाहनाय सपरिवाराय सावारणाय श्रीरामचन्द्राय परब्रह्मणे नमः रामचन्द्रश्रीपादुकां पूजयामि तर्पयामि नमः (त्रिवारं)
अनेन दशावरण पूजनेन भगवान् श्रीरामचन्द्र सुप्रसन्नः सुप्रीतो वरदो भवतु ॥

दशावरणपूजेयं कर्तव्या साधकोत्तमैः ।

आराधनासमर्थश्चेद् दद्यादर्चनसाधनम् ॥

यो दातुं नैव शक्नोति कुर्यादर्चनदर्शनम् ।
निस्ताराय तदेवालं भवाब्धेर्मुनिसत्तम ॥

स्वाञ्जितसामग्रया पूजने समग्रं फलम्, परानीतद्रव्यैः पूजनेऽर्धं फलम् ।

## प्रार्थना-

ॐ नमो भगवते श्रीरामाय परमात्मने ।
सर्वभूतान्तरस्थाय ससीताय नमो नमः ॥

ॐ नमो भगवते श्रीमद्रामचन्द्राय व्यापिने ।
सर्ववेदान्तवेद्याय ससीताय नमो नमः ॥

ॐ नमो भगवते श्रीमद्विष्णवे परमात्मने ।
परात्पराय रामाय ससीताय नमो नमः ॥

ॐ नमो भगवते श्रीरघुनाथाय शार्ङ्गिणे ।
चिन्मयानन्दरूपाय ससीताय नमो नमः ॥

ॐ नमो भगवते श्रीरामकृष्णाय चक्रिणे ।
विशुद्धज्ञानदेहाय ससीताय नमो नमः ॥

ॐ नमो भगवते श्रीवासुदेवाय विष्णवे ।
पूर्णानन्दैकरूपाय ससीताय नमो नमः ॥

## अथ धूपदीपनैवेद्यादिना पूजनं कृत्वा नीराजनं कुर्यात्

श्रीरामयन्त्रपूजोपरान्त भगवतः श्रीरामचन्द्रस्य तुलसीपत्रेण सहस्रार्चनं कुर्यात्
ततः भगवतःबालस्वभावं ध्यायन् बालोचित स्निग्धनैवेद्यं समर्पयेत् अनन्तरं मध्यान्हवेलायां भगवतःकिरीटधनुषादि निष्कास्य महानैवेद्यस्य योजनां कुर्यात् ।
अथ महानैवेद्यसमये पात्राणि प्रक्षाल्य पूर्ववत्पूर्णकुम्भजलेन पात्राणि पूरयित्वा भोज्याशनार्थं पादुके प्रसार्याचार्यादिभिरभ्यर्च्य मधुपर्कञ्च प्रदाय भगवतः श्रीरामचन्द्रस्य पुरस्ताच्छुचिप्रदेशे यथाशक्तिसम्पादितं चतुर्विधं (लेह्य, पेय, चर्व्य, चोस्य) षड्रससम्पन्नभोज्यादीनि (मधुर, अम्ल, लवण, कटु, कषाय, तिक्त) संस्थापयेत् - ।
पूर्वविधिना नैवेद्यं कुर्यात्

ततो जलपानहस्तशोधनगण्डूषपाद्याचमनादिभिः समर्च्य ताम्बूलं समर्पयेत्
अनन्यतावेदनस्तोत्रपुरुषसूक्तादिकं पठन् प्रदक्षिणनमस्कारादिभिः सम्पूज्य पूर्वविधिना नीराजनं कृत्वा तत्स्थलंसम्प्रोक्ष्य पानीयं जलं संस्थाप्य भगवन्तं  श्रीरामचन्द्रं विश्रामयेत् -
पुनः मध्याह्नकालीनविश्रामानान्तरभगवन्तं श्रीरामचन्द्रं घण्टानाद पुरस्सरं स्तोत्रेण उत्थापयेत् । पूर्णकलशं प्रपूर्व त्रिराचमनपुरस्सरं धूपदीपनैवेद्येन पूर्वविधिना चतुर्थनीराजनम् ।
सायंसन्ध्याकाले धूपदीपनैवेद्येन पूर्वविधिना पञ्चमनीराजनम् ।

## जयघोष

श्रीरामलला सरकार की जय ।
श्रीआनन्दकन्द भगवान् की जय ।
श्रीकौसल्यानन्दन भगवान् की जय ।
श्रीदशरथनन्दन भगवान् की जय ।
श्रीकेकयीनन्दन भगवान् की जय ।
श्रीसुमित्रानन्दन भगवान् की जय ।
श्री चारों भैयन की जय ।
श्रीहनुमान् जी महाराज की जय ।
श्रीरामजन्मभूमि की जय ।
श्रीकृष्णजन्म भूमि की जय ।
श्रीकाशीविश्वनाथ की जय ।
श्रीअयोध्या धाम की जय ।
श्रीसरयू महारानी की
जगद्गुरु स्वामी श्रीरामानन्दाचार्य जी महाराज की जय ।
गोस्वामी श्रीतुलसीदास जी महाराज की जय ।
समस्त पूर्वाचार्यों की जय ।
सर्वसन्तवैष्णव भगवान् की जय ।
सत्य सनातन धर्म की जय ।
गो माता की जय ।
भारत माता की जय ।
सन्ध्या आरती की जय जय श्री सीताराम

## सायङ्कालीनस्तुतिः

रघुपते पतितं भववारिधौ विकलितं दलितं च जगद्रुजा ।
अशरणं कुरू मां चरणाश्रितं भव भवा बयदोभय भजन ॥ १॥

रघुपते सुखदां शुभदां दृशं मयि निपातय पातय पातकम् ।
करुणया निग्रहाण जगत्पते सतत पाप करं किल मे करम् ॥ २॥

न जननी जनको न च बान्धवो नहि सखा न परे ऽद्य सहायकाः ।
मम जगज्जलधौ विनिमज्जतो रघुपते शरणं चरणौ तव ॥ ३॥

रघुपते न कदापि दया वशात्सर्वगुरुणा गुरूणापि कटाक्षितः ।
अहमतः कुदृशं ननु मादृशं तव बिना दयया क इहावतु ॥ ४॥

मम जपो न तपो न दया निधे न सुकृतं कृतमप्यपरं क्वचित् ।
रघुपतेऽशरणस्य च केवलं भवदभीद पदाब्जरजो बलम् ॥ ५॥

तव पुरः शतशो दुरितान्यहं रघुपते विदधामि निरर्गलम् ।
प्रतिदिनं तत एव वि लज्जया किमपि वक्तु मलं न बलं मम ॥ ६॥

मलिन कर्म कृदस्मि यदत्यहं रघुपते ऽस्मि तथापि जनत्सव ।
हर ततो विपदा मन पायितामपयशो बहुशो भवितान्यथा ॥ ७॥

न गणिता गणिका करुणानिधे तव च धामिनि सानिदधे त्रया ।
रघुपते तव किं मम तारणे चरण धूलिरियं गणनाकुला ॥ ८॥

असद् जामिल आत्थ विभो कदा भुवि तपांसि च कानि कृतानियत ।
रघुपते विवशः परमे पदे रमयशे नितरामधुनाऽपितम् ॥ ९॥

रघुपते करुणा बरुणालय त्वमसि दीन समुद्धरणव्रतीद्ध ।
अत इदं विनयामि पुनः पुनः सहजया दयया परि पाहिमाम् ॥ १०॥

अथ सायन्नैवेद्य समये पात्राणि प्रक्षाल्य पूर्ववत्पूर्णकुम्भजलेन पात्राणि पूरयित्वा भोज्याशनार्थं पादुके प्रसार्याच्र्यादिभिरभ्यच्र्य मधुपर्कञ्च प्रदाय भगवतः श्रीरामचन्द्रस्य पुरस्ताच्छुचिप्रदेशे यथाशक्तिसम्पादितं चतुर्विधं (लेह्य पेय चर्व्य चोस्य) षड्रससम्पत्रं (मधुर, अम्ल, लवण, कटु, कषाय, तिक्त) भोज्यादीनि संस्थापयेत् -
पूर्वविधिना दुग्धेन नैवेद्यं कृत्वा ताम्बूलं समर्पयेत्
अतः परं भगवतः शयन आरतीं पूर्वविधिना कुर्यात् ।

इत्याद्यनन्यतावेदनस्तोत्रपुरुषसूक्तादिकं पठन् प्रदक्षिणनमस्कारादिभिः सम्पूज्य भगवन्तं श्रीसीतासमेतं श्रीरामचन्द्रं विश्रामयेत् -
निद्रां कुरुस्व भगवन् ! पार्षदैरभिरक्षितः इति प्रार्थयन् निम्नाष्टकं गायन् शाययेत् ।
माता गीत्वा स्वपुत्रं यदि शयनगतं संविधत्तेऽथ शेषिन्
शेषत्वात्सात्म्यतत्वं गतवत इह मे कौशलाधीशजायाः ।
वात्सल्यातुल्यपात्रं स्वपिहि गुणगणोदारगीतेन गीतो
देहे सीधेऽतिशुद्ध भजनकलनतः स्वान्तदोलाऽषिशायी ॥ १॥

कौशल्या कीर्ति धन्या पद्युदरजनिमागाग्रगद्यत्तनुः स
श्रीरामौ रावणस्याऽप्युपवनशिरसां कर्तितैकेषुणाद्राक् ।
जामाताऽन्वर्थनाम्नो नृपतिकुलमणेर्यो विदहस्य कुर्यात्
स्थापं दोलां श्रितो हुन् मम दशरथसूर्भक्तिगङ्गाम्बुधौतम् ॥ २॥

नीलाभी नीलापद्योद्भवकृतजगतीनाथ सीताधिनाथः
सद्भिर्भाँग्योऽपि भोग्यं ननु निखिलमिदं यस्य लीलाघृताङ्गः ।
धन्वोन्मुक्तेषुणाऽब्जच्छदमिव सितवां स्ताटकोरः परेशो
भक्तिक्षीराब्धिशेषं सदपि मम मनोदोलिकांसोऽधिशेताम् ॥ ३॥

राज्यं दत्त्वाऽनुजायाऽतिविपुलविलसच्छरीसमिद्धं निरीहो
वक्ष्यस्वीवीरलक्ष्मी वसतिरनुपमोदारकीर्तिर्निरर्तिः ।
अव्राजील्लक्ष्मणेनाऽतिगहनविपिनं भक्तिभाजाऽनुजे-
नाऽऽशेतां दोलां वरेण्यो मम हृदयकृतां सज्जनानां शरण्यः ॥ ४॥

साकेतेशो विमातुर्वचनकरवरो ज्ञानिनामग्रभूमिः
पौरैर्पित्रैस्तथान्यैरनुगमनकरैर्दण्डकां साकमाप्तः ।
शेषाणां तन्मुनीनां परमहितकृते दिव्यभैषज्यतुल्यो
दोलायां स्वापमेयाद्रघुकुलतिलकोमानसे मे स रामः ॥ ५॥

सुग्रीवायाऽधिराज्यं ददद्भिनवकाऽब्दच्छविर्वालिकालः
पारावारेऽप्यपारे गिरिवरनिकरैर्बद्धसेतुर्विभुर्यः ।
प्राकारैः प्रावृत्तां तां दशमुखनगरी ध्वंसिता ध्यानगम्यो
दोलां चेतोऽधिशेतां मम सकलकलोध्वन्विनां ग्रामणीः सः ॥ ६॥

लोकाक्ष्या सेचनाढ्यातुलबलवपुषा राजमानोविमानः
प्रोन्मीलनीलपङ्केरुहवदनघनश्यामधामाभिरामः ।
कोदण्डेनेषुणा चोल्लसितकरकजः श्रीविशालः सुमाल

श्चित्ते स्वापं ममेयादहितविहतिकृद्दोर्लिकायां स रामः ॥ ७॥

वीराणामग्रणीर्यः सुरदनुजनृणां जन्मिनां वेतरेषां
कर्तापाताऽथहर्ता समविरुदयतो हेयहीनोऽप्यहीनः ।
स्तुत्यो नम्यश्चगम्यश्चिदचिदुभयव्यापिवर्षानिरूष्मा
रामः स्वापं म एयादसितमणितनुर्दोर्लिकायां स चित्ते ॥ ८॥

Proofread by Mrityunjay Pandey

*Shri Ramopasana*

pdf was typeset on February 16, 2024

Please send corrections to *sanskrit@cheerful.com*